IIJ Impact Factor : 2.193 ISSN 2349-364X

# वेदाञ्जली

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष- ६ अंक- १२, भाग- ३ जुलाई-दिसम्बर, २०१९

प्रधान सम्पादक

डॉ० रामकेश्वर तिवारी

असिस्टेन्ट प्रोफेसर, श्री बैकुंठनाथ पवहारी संस्कृत महाविद्यालय
बैकुंठपुर, देवरिया

सह सम्पादक

श्री प्रसून मिश्र

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

IIJ Impact Factor : 2.193 ISSN-2349-364X

# वेदाञ्जली

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोध पत्रिका

*(An International Peer Reviewed Refereed Research Journal)*

वर्ष-६ अंक-१२ भाग-३
जुलाई-दिसम्बर, २०१९

प्रधानसम्पादक
डॉ0 रामकेश्वर तिवारी
असिस्टेन्ट प्रोफेसर, श्री बैकुंठनाथ पवहारी संस्कृत महाविद्यालय
बैकुंठपुर, देवरिया

सह सम्पादक
श्री प्रसून मिश्र

प्रकाशक
वैदिक एजूकेशनल रिसर्च सोसाइटी
वाराणसी

## संरक्षकद्वय

जगत्शिष्य पं. शिवपूजन चतुर्वेदी

श्री नरवट वॉयरा (जर्मनी)

## प्रधानसम्पादक

डॉ0 रामकेश्वर तिवारी

## सह सम्पादक

श्री प्रसून मिश्र

## सम्पादक मण्डल

डॉ0 उमाकान्त चतुर्वेदी

डॉ चन्द्रकान्त दत्त शुक्ल

डॉ0 कुमार मृत्युंजय राकेश

डॉ0 देवि प्रभा

## शोध पत्र–समीक्षक मण्डल

- डॉ0 उमापति मिश्र, अतिथि अध्यापक, वेद विभाग, का0हि0वि0वि0, वाराणसी
- डॉ0 पवन कुमार यादव, सहायकाचार्य, दर्शन, सी0एम0पी0 डिग्री कॉलेज, प्रयागराज
- डॉ0 चिरंजीवी अधिकारी, आचार्य, व्याकरण, श्रीमाता वैष्णो देवी गुरुकुल चरण पादुका कटरा जम्मू कश्मीर
- डॉ0 निर्भय कुमार पाण्डेय, सहायकाचार्य (संविदा), ज्योतिष, रानी पद्मावती तारा योगतन्त्र आदर्श संस्कृत महाविद्यालय, वाराणसी
- डॉ0 नीरज तिवारी, सहायकाचार्य, साहित्य, राष्ट्रिय संस्कृत संस्थान, लखनऊ परिसर, लखनऊ
- डॉ0 नन्दकिशोर तिवारी, सहायकाचार्य, व्याकरण, राष्ट्रिय संस्कृत संस्थान, भोपाल परिसर, लखनऊ
- डॉ0 रविशंकर पाण्डेय, सहायकाचार्य, संस्कृतविद्या विभाग, स0स0वि0वि0, वाराणसी
- डॉ0 सुनील कुमार तिवारी, सहायकाचार्य, हिन्दी, शहीद भगत सिंह कॉलेज, दिल्ली विश्वविद्यालय, दिल्ली
- डॉ0 रंजन कुमार त्रिपाठी, सह–आचार्य, साहित्य, संस्कृत विभाग, दिल्ली विश्वविद्यालय, दिल्ली
- डॉ0 अशोक राम, असि0प्रोफेसर, भूगोल विभाग, एस0एन0 सिन्हा कॉलेज, वार्सलिगंज, बिहार

## परामर्शदात्री समिति

प्रो0 बाल शास्त्री

प्रो0 चन्द्रमौली उपाध्याय

प्रो0 हरीश्वर दीक्षित

डॉ0 राजीव रंजन तिवारी

श्री यज्ञेश तिवारी

प्रो0 रमेशचन्द्र पण्डा

डॉ0 कामेश्वर उपाध्याय

प्रो0 रामजीवन मिश्र

श्री जय प्रकाश चतुर्वेदी

श्री संजय पाठक



**प्रकाशन तिथि : 26 सितम्बर, 2019**



## सम्पर्क सूत्र

**श्री अंकित दुबे**

तारा नगर कॉलोनी, छित्तुपुर, लंका, वाराणसी।

दूरभाष : 9473531601

Website : vedanjalijournal.com / e-mail : vedanjali2014@gmail.com


---


**विशेष :** पत्रिका के किसी भी प्रकार की समस्या के समाधान का अधिकार संरक्षकों के पास स्थायी रूप से सुरक्षित है तथा लेखकों के शोध–पत्र उनके अपने विचार हैं, पत्रिका परिवार उनके विचारों से सहमत हो यह आवश्यक नहीं है।

- विश्व राजनीति में भारत–चीन सम्बन्ध
  *संजय कुमार मिश्र* 60–62
- पर्यावरणसमस्यायाः वैदिकसमाधानम्
  *डॉ0 सर्वेश रमण तिवारी* 63–65
- दक्षिण पूर्व एशिया में भारतीय संस्कृति
  *डॉ0 शिवा कान्त त्रिपाठी* 66–70
- बिहार में पर्यटन केन्द्रों की समस्याएँ एवं समाधान
  *डॉ0 स्वर्गेश कुमार* 71–73
- आधुनिक सन्दर्भ में प्राचीन भारतीय शिक्षा दर्शन : एक समीक्षा
  *डॉ0 विनोद कुमार यादव* 74–77
- भारतीय सन्दर्भ में संस्कारों का सामाजिक एवं सांस्कृतिक विवेचन
  *ओम प्रकाश सिंह यादव* 78–81
- चार्वाक दर्शन : मनोवैज्ञानिक एवं व्यावहारिक पक्ष
  *प्रीति माहेश्वरी* 82–86
- लोंजाइनस के उदात्त तत्व की महत्ता
  *रविशंकर* 87–89
- महिला सशक्तिकरण एवं विचारधारा
  *डॉ0 दीपक प्रकाश वर्द्धन व संदीप गोल्डी* 90–95
- वक्रोक्ति सिद्धान्त की स्थापना में आचार्य कुंतक का अवदान
  *सत्यप्रकाश शर्मा* 96–98
- मौर्यकालीन आर्थिक संस्थाओं का उद्भव और विकास
  *डॉ0 विजय कुमार सिंह व सुरेन्द्र प्रसाद* 99–101
- बौद्ध दर्शन के वैभाषिक सम्प्रदाय में परिवर्तन की आलोचनात्मक व्याख्या 102–105
  *डॉ0 दीपिका राजपूत*
- दायभागे स्त्रीणामधिकारः
  *डॉ मीनाक्षी मिश्रा* 106–108
- भारतीय स्त्रियों की चारित्रिक विशेषताएँ
  *डॉ0 शारदा कुमारी* 109–110
- लिंग महापुराण में योग विज्ञान
  *पारूल खण्डेलवाल* 111–112
- राष्ट्र निर्माण में रवीन्द्रनाथ टैगोर का योगदान
  *धर्मेन्द्र कुमार* 113–114
- पातंजलयोग दर्शन में चित्त प्रसादन का स्वरूप
  *डॉ0 लीला कन्याल* 115–119
- बिहार में किसान आन्दोलन और राजनीतिक दल :
  एक ऐतिहासिक अध्ययन 120–123
  *डॉ0 मधुरिमा*

# दायभागे स्त्रीणामधिकारः

डॉ0 मीनाक्षी मिश्रा*

भारतवर्षे विचारितेषु विभिन्नेषु शास्त्रेषु अष्टादशविद्यासु च धर्मशास्त्रं प्रमुखं स्थानं भजतीत्यत्र नास्ति संदेहलेशः, यतोहि शास्त्रान्तराणि सर्वाणि

धर्मशास्त्रस्यैवानुकूल्येन प्रवर्तन्ते प्रशंसन्ति च। धर्मशास्त्रसाहित्यमिदं प्रमुखतया त्रिधा विभक्तं दृश्यते– स्मृतिसूत्रनिबन्धसाहित्यञ्चेति।

धर्मशास्त्रस्य बहवोविषयाः लोकसंव्यवहारार्थमुपयुज्यन्ते। तेषु विषयेष्वाचार– व्यवहारप्रायश्चित्तादिकं प्रमुखभावेन लोके प्रयुज्यते। तत्रापि व्यवहाराध्यायस्य लौकिकोपयोगित्वं सातिशयं विद्यते। व्यवहाराध्याये प्रतिपादितेष्वष्टादशविवादपदेषु दायभागाख्यं विवादपदं प्रधानीभूतं प्रसिद्धतरञ्च दृश्यते। तस्मिन् दायभागे स्त्रीणामधिकारविषये चर्चा अत्र क्रियते।

पितुरिच्छयाविभागो द्विधाप्रदर्शितः, समोविषमश्चेति। अत्रानयोर्विषमविभागः स्वार्जितद्रव्यविषयपरकः। विषमविभागे स्त्रीणां दायाधिकारविषये यद्यपि साक्षात् किमपिनोक्तम्। तथापि याज्ञवल्क्योक्त "विभजेत्सुतानिति"[1] वचनात् पुत्रा एवाधिकारिण इतिज्ञानमुत्पद्यते। पितृक्रमायाते तु समस्वाम्यस्य वक्षमाणत्वान्नेच्छया

विषमविभागो युक्तः। अतः समविभागे विशेषवचनं याज्ञवल्क्यस्य[2]–

**यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः।**
**न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा।।**

अर्थात् यदा स्वेच्छया पिता सर्वानेव सुतान् समविभागिनः करोति तदा पत्न्यश्च पुत्रसमांशभाजः कर्त्तव्याः, यासां पत्नीनां भर्ता श्वशुरेण वा स्त्रीधनं न दत्तम्। दत्ते तु स्त्रीधनेऽर्धांशं वक्ष्यति। किञ्चापि याज्ञवल्क्येनोक्तम्।[3]

**अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम्।**
**न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकल्पयेत्।।**

अधिविन्नस्त्रियै अधिवेदननिमित्तं धनं समं यावदधिवेदनार्थं व्ययीकृतं तावद् दद्यात्। यस्यै भर्त्रा श्वशुरेण वा स्त्रीधनं दत्तम्, दत्ते पुनः स्त्रीधने

आधिवेदनिकद्रव्यस्यार्धं दद्यात्। "अर्ध" शब्दश्चात्र समविभागवचनं न भवति, अतश्च यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद् देयमित्यर्थः।

यदा तु श्रेष्ठभागादिना ज्येष्ठादीन् विभजति तदा पत्न्यः श्रेष्ठादिभागान्नलभन्ते। किन्तूद्धतोद्धारात्समुदायात्समानेवांशाल्लभन्ते स्वोद्धारं च।

पुनश्चापि जीवद्विभागे स्वपुत्रसमांशित्वं पत्नीनामुक्तम्। पितृरुर्ध्वं विभागेऽपि पत्नीनां स्वपुत्रसमांशित्वं दर्शयितुमाह[4]–

**"पितुरुर्ध्वं विभजतां माताप्यंशं समं हरेत्।।**

पितुरुर्ध्वमर्थात् पितुः प्रयाणादूर्ध्वं विभजतां मातापि स्वपुत्रांशसममशं हरेत्, यदि स्त्रीधनं न दत्तम्, दत्ते त्वर्धांशहारिणीतिकथ्यते।

मुनयो हि मन्वादयो देशकालावस्थादिविशेषदृष्ट्या वचनान्युदाजहुः। आचार्यश्च यथायथं व्यवस्थापयितुं चेष्टमाना अपि क्वचित् क्वचिदकृतकार्या इव लक्ष्यन्ते। स्त्रीणां दायाधिकारविषये कन्यानां दायाधिकारे यथाचोक्तं मनुना[5]–

*सहायकाचार्यः, धर्मशास्त्रविभागः, श्री ला.ब.शा.रा.स.वि. नवदेहली

**स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्।**
**स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः।।**

तथा याज्ञवल्क्येनोक्तम्[6]–

भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकम्। विज्ञानेष्वरस्य मतानुसारं यदि कस्यचिद् ब्राह्मणस्य पुत्रश्चैकः कन्याचैका तत्र पित्र्यं सर्वमेवद्रव्यं

द्विधाविभज्य तत्रैकभागं चतुर्धाविभज्य तुरीयमंशं कन्यायै दत्त्वा शेषं पुत्रो गृह्णीयादिति समाहितम्। तेन कन्यया भ्रातुः सप्तमोभागोलब्धः न तु चतुर्थः। अनया रीत्या भगिनीबाहुल्ये तासामंशोऽधिकमपि ह्रसते। अर्थात् यज्जातीया कन्या, तज्जातीयपुत्रभागाच्चतुर्थांशभागिनी सा कर्त्तव्या। यदि ब्राह्मणी सा कन्या तदा ब्राह्मणीपुत्रस्य यावानंशोभवति, तस्य चतुर्थांशस्तथा भवति। तद्यथा– यदि कस्यचिद् ब्राह्मणस्यैकापत्नी पुत्रश्चैकः कन्याचैका, तत्र पित्र्यं सर्वमेव द्रव्यं द्विधाविभज्य तत्रैकभागं चतुर्धाविभज्य तुरीयमंशं कन्यायै दत्त्वा शेषं पुत्रो गृह्णीयात्, यदा द्वौ पुत्रौ एका च कन्या, तदा पित्र्यं धनं सर्वं त्रिधा विभज्य एकं भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्त्वा शेषं पुत्रौ गृह्णीयाताम्। अथ त्वेकः पुत्रो द्वे कन्ये, तदा पित्र्यं धनं त्रिधाविभज्य एकं चतुर्धाविभज्य द्वौभागौ द्वाभ्यां कन्याभ्यां दत्त्वावशिष्टं सर्वं पुत्रो गृह्णातीत्येवं समानजातीयेषु भ्रातृषु भगिनीषु च योजनीयम्।

यदा तु ब्राह्मणीपुत्र एकः क्षत्रिया कन्या चैका, तत्र पितृधनं सप्तधाविभज्य क्षत्रियापुत्राभागांस्त्रीन्च– तुर्धाविभज्य तृतीयांशं क्षत्रियाकन्यायै दत्त्वा शेषं ब्राह्मणीपुत्रो गृह्णाति। यदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्या चैका, तत्र पित्र्यं धनमेकादशधा विभज्य तेषु त्रीनंशान् क्षत्रियापुत्रभागांश्चतुर्धाविभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्त्वा शेषं सर्वं ब्राह्मणीपुत्रौविभज्य गृह्णीयाताम्।

एवं जातिवैषम्ये भ्रातृणां भगिनीनाञ्च साम्ये वैषम्ये च सर्वत्रोहनीयम्।

प्रचलिते प्रसङ्गेऽस्मिन् दायभागकारजीमूतवाहनेनोक्तं कात्यायनवचन–

माधारीकृत्य[7]–

**"मातापि पितरि प्रेते पुत्रतुल्यांशभागिनी।"**

अर्थात् पितुर्मरणानन्तरं पुत्र यदा पितुर्धनं विभजन्ति तदा माताऽपि समांशहारिणी स्यादित्युक्तम्।

किञ्चापि पितरि चोपरते सोदरभ्रातृर्विभागे क्रियमाणे मात्रेऽपि पुत्रसमांशः दातव्यः "समांशहारिणी मातेति" वचनात्। मातृपदस्य जननीपरत्वात्, न सपत्नीमातृपरत्वम्, सकृच्छ्रुतस्य मुख्यगौणत्वानुपपत्तेः। समांशता च मातुर्भर्त्रादिभिः स्त्रीधनादाने, दत्ते पुनः अधर्मः। पित्रा च पुत्रेभ्यः समविभागदाने सर्वपत्नीनामेव पुत्रसमांशता कर्त्तव्या।

अत्रापि संदर्भे दायभागकारेण याज्ञवल्क्यादिवचनं[8] स्वीकृतम् यथा–

**यदि कुर्यात्समानांशन् पत्न्यः कार्याः समांशिकाः।**
**न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा।।**

पुत्रहीनाश्च पितुः पत्न्यः समानांशाः, न पुत्रवत्यः। तथा व्यासवचनमङ्गीकृतम्।[9] यथा–

**असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः।**
**पितामह्यश्च सर्वास्ताः मातृतुल्याः प्रकीर्त्तिताः।।**

दायभागकारजीमूतवाहनेन कन्यादायविषये वृहस्पतिव्यासयाज्ञवल्क्यनारदादीनां वचनानि उदाहरणरूपेणाङ्गीकृत्यैवं व्याख्यातम्–

**"समांशामातरस्त्वेषां तुरीयांशश्चकन्यकाः।"**

अस्माद् बृहस्पतिवचनात्[10] पुत्रस्य भागत्रायं कन्याया एकोभागइति।

**कन्यकानां त्वदत्तानां चतुर्थोभाग इष्यते।**
**पुत्राणाञ्च त्रयोभागाः स्वाम्यं स्वल्पधने स्मृतम्।।**

कात्यायनवचनस्यार्थ[11] एवमेवकृतः –

**अल्पधने पुत्रैः स्वात् स्वादंशादाकृत्य कन्याभ्यश्चतुर्थांऽशोदातव्यः।**
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः।।

मनुवचनस्यार्थोऽपि[12] अनेन प्रकारेण कृतः। यथा–

प्रदद्युरिति प्रदानश्रुतेः, अदाने च पतितत्वश्रुतेः, न कन्याभिरधिकारवृद्धया ग्रहीतव्यम्।

**असंस्कृतास्तु संस्कार्याभ्रातृभिः पूर्वसंस्कृतैः।**
**भगिन्यश्च निजादंशाद्दत्वांशंतु तुरीयकम्।।**

अनेन याज्ञवल्क्यवचनमाध्यमेन[13] भगिनीनां संस्कार्यतामाह, नाधिकारिताञ्च बहुतरधने विवाहोचितधनं दातव्यम्, न चतुर्थांशनियम इतिसिद्धयति। एतच्चकन्यापुत्रयोः समसंख्यत्वे ज्ञातव्यम्।विषमसंख्यत्वे च कन्याया एव बहुतरधनं वा स्यात्, पुत्रस्य वा निर्धनता – **स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्।**

अतोनेदमुचितं पुत्रस्य प्राधान्यात्।

इत्थमेव पितृपितामहादिधनविभागे स्त्रीणामधिकारोदायभागकारेणोक्तः।

स्त्रीणां दायाधिकारविषये नारद–देवल–विष्णु–कात्यायन– शङ्खलिखित–बौधायनादीनां मतानि मिताक्षराकारदायभागकाराभ्याञ्च संगृह्यस्वमतं प्रकटितमतोभिन्नतया पुनः द्विरुक्त्याभाषभयात् पूर्वोक्तानां धर्मशास्त्रकाराणां मतानि नोल्लिख्यन्ते।

1956 तः परिवर्तितार्वाचीनहिन्दूत्तराधिकारिविधौ स्त्रीणां दायाधिकारे परिवर्तनम् एवमेव जातम्। हिन्दूत्तराधिकारिविधिधारा[14] 10, उपधारा 1 द्वाराविधवानारीमृतपत्युर्धनेदायाधिकारिणी जाता। अर्थात् सा विधवा माता भवतु वा पत्नी भवतु सा दायादैः सह समांशभाजाऽभूत।

सर्वविधक्षेत्रेऽपि साऽऽत्मनोदायाधिकारं विनियोजयितुं समर्थेति प्रतिपादितम्।

तथा चोपधारा 10, अनुधारा 2 द्वारा जीविताः पुत्राः कन्यकाः माता च समानरूपेणैकभागं प्राप्स्यन्तीति ज्ञायते।

किञ्चाधुनिकोत्तराधिकारि विधेरुपविधिः 10, अनुविधि 3 द्वारा दायभागात् पूर्वं मृतपुत्रस्य पुत्रः मृतकन्यायाश्च कन्याप्रत्येक एकैकंभागं गृह्णीयादित्यवगम्यते।

दायभागे स्त्रीणां दायाधिकारविषये प्राचीनाधुनिकहिन्दूत्तराधिकारिविध्योरिदमेव पार्थक्यम् इतिप्रतिपाद्यते।

## सहायकग्रन्थसूची

1. याज्ञवल्क्यस्मृतिः
2. मनुस्मृतिः
3. कात्यायनस्मृतिः
4. जीमूतवाहनदायभागः
5. दायभागविमर्शः
6. मिताक्षरा
7. दहिन्दुकोड

## सन्दर्भ :

1. याज्ञवल्क्य स्मृतिः–2.114
2. याज्ञवल्क्यस्मृतिः–2.115
3. याज्ञवल्क्यस्मृतिः – 2.148
4. याज्ञवल्क्य स्मृतिः – 2.123
5. मनुस्मृतिः–9.118
6. याज्ञवल्क्यस्मृतिः – 2.124
7. कात्यायनस्मृतिः – 3.85
8. याज्ञवल्क्यस्मृतिः–2.115
9. व्यासवचनम् दायभाग–पृ.–29
10. वृहस्पतिवचनम्, दायभाग. पृ.–29
11. कात्यायनवचनम् दायभाग पृ.–29
12. मनुस्मृति– 9.115
13. याज्ञवल्क्यस्मृतिः–2.124
14. The Hindu Code, (Hindu Succession act - section 8-13)

IIJ Impact Factor : 3.178 ISSN 2349-364X

# वेदाञ्जली

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-७ अंक-१४, भाग-१ जुलाई-दिसम्बर, २०२०

प्रधान सम्पादक
डॉ० ज्ञानेश्वर तिवारी

सह सम्पादक
श्री प्रसून मिश्र

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

IIJ Impact Factor : 3.178 ISSN-2349-364X

# वेदाञ्जली

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-७ अंक-१४ भाग-१

जुलाई-दिसम्बर, २०२०

प्रधानसम्पादक

डॉ0 रामकेश्वर तिवारी

सह सम्पादक

श्री प्रसून मिश्र

प्रकाशक

वैदिक एजूकेशनल रिसर्च सोसाइटी

वाराणसी

## संरक्षकद्वय

जगत्शिष्य पं. शिवपूजन चतुर्वेदी
श्री नरवट वॉयस (जर्मनी)

**प्रधानसम्पादक**
डॉ0 रामकेश्वर तिवारी

**सह सम्पादक**
श्री प्रसून मिश्र

## सम्पादक मण्डल

डॉ0 उमाकान्त चतुर्वेदी
डॉ0 कुमार मृत्युंजय राकेश
डॉ चन्द्रकान्त दत्त शुक्ल
डॉ0 देवि प्रभा

## शोध पत्र–समीक्षक मण्डल

- डॉ0 उमापति मिश्र, अतिथि अध्यापक, वेद विभाग, का0हि0वि0वि0, वाराणसी
- डॉ0 पवन कुमार यादव, सहायकाचार्य, दर्शन, सी0एम0पी0 डिग्री कॉलेज, प्रयागराज
- डॉ0 चिरंजीवी अधिकारी, आचार्य, व्याकरण, श्रीमाता वैष्णो देवी गुरुकुल चरण पादुका कटरा, जम्मू कश्मीर
- डॉ0 निर्भय कुमार पाण्डेय, सहायकाचार्य (संविदा), ज्योतिष, रानी पद्मावती तारा योगतन्त्र आदर्श संस्कृत महाविद्यालय, वाराणसी
- डॉ0 नीरज तिवारी, सहायकाचार्य, साहित्य, राष्ट्रिय संस्कृत संस्थान, लखनऊ परिसर, लखनऊ
- डॉ0 नन्दकिशोर तिवारी, सहायकाचार्य, व्याकरण, राष्ट्रिय संस्कृत संस्थान, भोपाल परिसर, लखनऊ
- डॉ0 रविशंकर पाण्डेय, सहायकाचार्य, संस्कृतविद्या विभाग, स0स0वि0वि0, वाराणसी
- डॉ0 सुनील कुमार तिवारी, सहायकाचार्य, हिन्दी, शहीद भगत सिंह कॉलेज, दिल्ली विश्वविद्यालय, दिल्ली
- डॉ0 रंजन कुमार त्रिपाठी, सह–आचार्य, साहित्य, संस्कृत विभाग, दिल्ली विश्वविद्यालय, दिल्ली
- डॉ0 अशोक राम, असि0प्रोफेसर, भूगोल विभाग, एस0एन0 सिन्हा कॉलेज, वार्सलिगंज, बिहार
- डॉ0 शशिकान्त तिवारी, दर्शन विशेषज्ञ, हरियाणा

## परामर्शदात्री समिति

प्रो0 बाल शास्त्री
प्रो0 रमेशचन्द्र पण्डा
प्रो0 हरेराम त्रिपाठी
प्रो0 हरीश्वर दीक्षित
प्रो0 रामजीवन मिश्र
प्रो0 श्रीपति त्रिपाठी
प्रो0 संतोष शुक्ल
डॉ0 कामेश्वर उपाध्याय
डॉ0 राजीव रंजन तिवारी
श्री जय प्रकाश चतुर्वेदी



**प्रकाशन तिथि : 21 / 08 / 2020**

**सम्पर्क सूत्र**
**श्री अंकित दुबे**
दूरभाष : 9473531601
Website : vedanjalijournal.com / e-mail : vedanjali2014@gmail.com

---

**विशेष** : पत्रिका के किसी भी प्रकार की समस्या के समाधान का अधिकार संरक्षकों के पास स्थायी रूप से सुरक्षित है तथा लेखकों के शोध–पत्र उनके अपने विचार हैं, पत्रिका परिवार उनके विचारों से सहमत हो यह आवश्यक नहीं है।

- **नासिरा शर्मा के कथा साहित्य में विभिन्न शैलियों की प्रासंगिकता** 153–155
  *संतोष कुमार सरोज*
- **हिन्दी उपन्यासों में अभिव्यक्त स्त्री जीवन के चित्र** 156–159
  *सारिका देवी*
- **वेदों में विज्ञान** 160–161
  *सरिता शुक्ला*
- **कमलेश्वर की कहानियों में नारी छवियाँ** 162–164
  *शेर बहादुर यादव*
- **भारतमञ्जरी में उपलब्ध उक्ति वैचित्र्य : एक अध्ययन** 165–169
  *शीतल शर्मा*
- **कामगार महिलाओं की सामाजिक सुरक्षा** 170–173
  *विनीता कुमारी*
- **युवाओं के मतदान के निर्णय को प्रभावित करने में डिजिटल मीडिया की भूमिका का अध्ययन** 174–180
  *डॉ0 अनुराधा शर्मा व उदित्य सिंह सेंगर*
- **भारतीयसंस्कृतौ श्राद्धस्य महत्त्वम्** 181–185
  *डॉ0 मीनाक्षी मिश्रा*
- **साहित्यशास्त्रे अलंकारविमर्शः** 186–188
  *आदेश मिश्र*
- **हरिपादोद्भवगंगा** 189–193
  *अंजिता साहु*
- **आचार्यजयमन्तमिश्रकृत – महामानवचम्प्वां भौगोलिकवर्णनम्** 194–200
  *डॉ0 रणजीत कुमार झा*
- **आनन्दवर्धनप्रतिपादितं ध्वनितत्वम्** 201–203
  *डॉ0 रातुल बुजर बरुवा*
- **हिन्दी के विकास में बंगाल का अवदान** 204–209
  *डॉ0 श्रीनिवास सिंह यादव*
- **वेदों में अर्थ और काम** 210–214
  *डॉ0 श्यामलेश कुमार तिवारी*
- **अष्टाध्याय्याः संरचनापद्धतेः वैशिष्ट्यम्** 215–220
  *ज्वलन्त कुमार*
- **रुद्रस्य भौतिक आधारः अग्निः** 221–223
  *महेश शर्मा*
- **पंडित दीनदयाल उपाध्याय : साधारण व्यक्ति का असाधारण व्यक्तित्व** 224–228
  *मंगल प्रताप पाण्डेय*
- **वैदिकराष्ट्रशासनस्य संकल्पना** 229–230
  *परेश हेमन्त भाई जानी*

# भारतीयसंस्कृतौ श्राद्धस्य महत्त्वम्

डॉ0 मीनाक्षी मिश्रा*

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्ष तद् भारतं नाम भारती यत्र सन्ततिः।।**[1]

तस्य भारतस्य प्रतिष्ठे द्वे-संस्कृतं संस्कृतिस्तथा। संस्कृतवाङ्मये अस्माकं संस्कृतिर्निहिता। "संस्कृतिः" नाम किम्? इति विचारयामश्चेत्, राष्ट्रनिवासिनाम् उत्तम आचारव्यवहार एव राष्ट्रसंस्कृतिः कथ्यते। संस्कृतिः देशस्य आत्मा भवति। सर्वे एव प्राणिनः आत्मसुखस्य अभिलाषां कुर्वन्तित्कथ्यते, इयम् अस्माकं स्वाभाविकी प्रवृत्तिः। किन्तु सर्वेषां सुखकामना इति भारतीयानां संस्कृतिः। अस्माकं भारतीयसंस्कृतेः प्रमुखं वैशिष्ट्यं धर्मप्राधान्यम् अस्ति। धर्म एव मानवानां पशुभ्यो विशेषोऽस्ति अत उच्यते-

**आहारनिद्राभयं मैथुनञ्च सामान्यएतद् पशुभिर्नराणाम्।**
**धर्मो हि तेषाम् अधिको विशेषः धर्मेण हीनाः पशुभिः समानाः।।**[2]

अपि च धर्म एव एको मित्रम् यः मरणानन्तरमपि अभीष्टफलं प्रदातुमनुगच्छति।

उक्तञ्चमनुना-

**एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।**
**शरीरेण समं नाशं सर्वमन्यद्धि गच्छति।।**[3]

पुरुषार्थचतुष्टये मूर्धन्यभूतः पुरुषार्थः धर्म एव। अपि च धर्म बिना अर्थकाममोक्षादि- पुरुषार्थानां प्राप्तिः न सम्भवति। वेदा अपि धर्म प्रशंसन्ति-

**धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति।**
**धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम् तस्माद्धर्मं परमं वदन्ति।।**[4]

पुरुषार्थचतुष्टये मूर्धन्यभूतस्य पुरुषार्थस्य चत्वारि प्रमाणानि सुविदितानि प्रसिद्धानि च, यानि भगवता मनुना प्रतिपादितानि-

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणाम्।।**[5]

वेदानां स्मृतीनाञ्च धर्मस्य प्रमाणत्वेन अङ्गीकारः कृतः महर्षिभिः। अत्र स्मृतिर्नाम धर्मशास्त्रम्। अस्मिन्नेव धर्मशास्त्रे आचाराध्यायान्तर्गते गृहस्थधर्माणां प्रसंगे पञ्चमहायज्ञानां प्रतिपादनं विहितं वर्तते। तत्र-

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**
**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।**[6]

याज्ञवल्क्यमतानुसारं-

**बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः।**
**भूतपित्रमरब्रह्ममनुष्याणां महामखाः।।**[7]

यःएतान् पञ्चमहायज्ञान् न करोति सः जीवन् अपि मृत इव भवति।

अस्मिन् सन्दर्भे मनुनोक्तम्-

**देवताऽतिथिभृत्यानां पितृणामात्मनश्च यः।**
**न निर्वपति पञ्चानामुच्छवसन्न जीवति।।**[8]

*सहायक आचार्य, धर्मशास्त्रविभागः, श्री ला.ब.शा.रा.सं.विवि. नवदेहली

**एतेषां पञ्चमहायज्ञानाम् इतर नामानि–**

**अहुतं च हुतं चैव तथा प्रहुतमेव च।**
**ब्राह्मं हुतं प्राशितं च पञ्चयज्ञान्प्रचक्षते।।[9]**
**एषु प्राशितं नाम पितृतर्पणम्।।[10]**
**ऋषयो पितरो देवा भूतान्यतिथयस्तथा।**
**आशासते कुटुम्बिभ्यस्तेभ्य: कार्यं विजानता।।[11]**

ऋषय:, पितर:देवा:, भूतानि तथा अतिथय: एते सर्वेऽपि सन्तुष्ट्यर्थं कुटुम्बिभ्य: आशां कुर्वन्ति, अत: निश्चयेन पञ्चमहायज्ञानाम् अनुष्ठानं गृहस्थै: करणीयम्।

**आपस्तम्बधर्मसूत्रे उल्लिखितम् यत्–** सह देवमनुष्या अस्मिन्लोके पुरा बभूवु:। पुरा देवाश्च मनुष्याश्च अस्मिन्नेव लोके सहैव बभूवु:। अथ तं सहभावम् असहमाना: देवा: श्रौतैस्मार्तैर्गाह्यैश्च यथावद् अनुष्ठितै: दिवं जग्मु:। मनुष्यास्तु तथा कर्तुम् असमर्था: इहैव लोके स्थिता:। एवं हीनान् मनुष्यान् दृष्ट्वा मनु: श्राद्धम् इति शब्द्यमानम् एतत् कर्म प्रोवाच। प्रजानिश्श्रेयसं चास्य श्राद्धकर्मण: फलम् इति। तत्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे।[12]

अत्र श्राद्धकर्मणि पितर: पितृपितामहप्रपितामहा: देवता: भवन्ति। ये ब्रह्मणा: भोजनार्थम् आयान्ति ते आहवनीय अग्ने: सूचका: भवन्ति।

**याज्ञवल्क्यमतानुसारं श्राद्धस्य लक्षणम्–** श्राद्धं नामादनीययस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्याग:।[13]

**पराशरमतानुसारं–**

**देशे काले च पात्रे च विधिना हविषा च यत्।**
**तिलैर्दर्भैश्च मन्त्रैश्च श्राद्धं स्याच्छ्रद्धया युतम्।।**

**रघुनन्दनस्यश्राद्धतत्त्वे–**

**संस्कृतं व्यञ्जनाद्यं च पयोमधुघृतान्वितम्।**
**श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते।।**

अत: वयं वक्तुं शक्नुम: यत् श्रद्धया पितृन् उद्दिश्य विधिना क्रियते यत्कर्म तत् श्राद्धम्।

**''श्रद्धार्थमिदं श्राद्धम्।'' ''श्रद्धया कृतं सम्पादितमिदम्।'' ''श्रद्धया दीयते यस्मात् तद्श्राद्धम्।'' ''श्रद्धया इदं श्राद्धम्।''**

विभिन्नेषु शास्त्रेषु श्राद्धस्य नैके भेदा: उक्ता:। याज्ञवल्क्यानुसारं श्राद्धं द्विविधम्– पार्वणम्, एकोद्दिष्टञ्च। तत्र त्रिपुरुषोद्देशेन यत्क्रियते तद् पार्वणम्। एकपुरुषोद्देशेन क्रियमाणमेकोद्दिष्टम्। पुनश्च त्रिविधम्– नित्यं नैमित्तिकं काम्यं चेति।

**गौतममतानुसारम्–**

**नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम्।**
**पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं बुधै:।।**

**यमस्मृतौ–**

**नित्यं नैमित्तिकं काम्यं वृद्धिश्रद्धम् अत: परम्।**
**पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं बुधै:।।**

**मत्स्यपुराणे–**

**''नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धमुच्यते।''** इति त्रय: भेदा: उक्ता:।

विश्वामित्रस्मृतौ-

श्राद्धस्य द्वादश भेदानामुल्लेखो विद्यते। तद्यथा-

**नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम्।**
**पार्वणं चेति विज्ञेयं गोष्ठीं शुद्धयर्थमष्टमम्।।**
**कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्।**
**यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्।।** इति

नित्यश्राद्धम्- प्रतिदिनं यत् क्रियते तत् नित्यश्राद्धम्। अशक्तावस्थायां नित्यश्राद्धे केवलं जलप्रदानेन एव श्राद्धस्य पूर्तिः भवति। नैमित्तिकश्राद्धम्- एकोद्दिष्टं श्राद्धं नैमित्तिकश्राद्धमुच्यते। काम्यश्राद्धम्-विशिष्टकामनायाः पूर्तिनिमित्तं यद् क्रियते तद् काम्यश्राद्धम्। वृद्धिश्राद्धम्- पुत्रादिजन्मावसरे विवाहादिकमांगलिककार्येषु यद् विधीयते तस्य नाम वृद्धिश्राद्धम्। पार्वणश्राद्धम्- अमावस्यापूर्णिमादिषु यद् विधीयते तद् पार्वणश्राद्धम् इति उच्यते।

**याज्ञवल्क्येन श्राद्धकालाः प्रकीर्तिताः-**

**अमावस्याऽष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्।**
**द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः।**
**व्यतीपातो गजच्छाया ग्रहणं सूर्यचन्द्रयोः**
**श्राद्धं प्रति रुचिश्चैते श्राद्धकालाः प्रकीर्तिताः।।**[14]

अर्थात्- अमावस्या। अष्टकाः-चतस्रः भवन्ति, हेमन्तशिशिरयोः चतुर्णाम् अपरपक्षाणाम् अष्टमीष्वष्टकाः। मासद्वये एका ऋतुः, एवं चतुर्षु मासेषु परपक्षः अर्थात् कृष्णपक्षचतुष्टयम् तत्र अष्टमी तिथिः ग्राह्या। वृद्धिः- पुत्रजन्मादि। कृष्णपक्षः- प्रतिमासं कृष्णपक्षः। अयनद्वयम्- उत्तरायणं दक्षिणायनञ्च। विषुवद्वयम्- मेषतुलयोः सूर्यगमनम्। सूर्यसंक्रमः-आदित्यस्य राशेः राश्यन्तरगमनम्। व्यतीपातो-योगविशेषः। गजच्छाया-योगाविशेषः। ग्रहणं-सोमसूर्ययोरुपरागः। श्राद्धं प्रतिरूचिः-यदा भवति तदा च श्राद्धकर्म कर्त्तव्यम्।

**मनुनाः अपि उक्तं यत्-**

**''पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्''।**[15]

अत्र मासानुमासिकं नाम प्रतिमासं कर्त्तव्यमित्यर्थः।

अपि च-**''पितृणां मासिकं श्राद्धमन्वाहार्यं विदुबुधाः।''**

श्राद्धे यत् भोजनादिकं ब्राह्मणेभ्यः श्रद्धया प्रदीयते तद् अस्माकं पितरः कथं प्राप्नुवन्ति इत्यस्मिन् विषये महर्षिणा **याज्ञवल्क्येन उक्तम्-**

**वसुरूद्रादितिसुताः पितः श्राद्धदेवताः।**
**प्रीणयन्ति मनुष्याणां पितृश्राद्धेन तर्पिताः।।**

अधिष्ठातृदेवताः वसुरुद्रादित्याः भवन्ति। वस्वादयः पुत्रादिभिर्दत्तेन अन्नपानादिना तृप्ताः सन्तः तान् पितृन् अपि तर्पयन्ति।

**मनुना उक्तं**

**वसून् वदन्ति तु पितृन्रुद्रांश्चैव पितामहान्।**
**प्रपितामहान्स्तथादित्यान् श्रुतिरषा सनातनी।।**[16]

नामकुलगोत्रादेः उच्चारणपूर्वकं श्राद्धं प्रदीयते अतः विश्वेदेवाः अग्निष्वातः आदयः दिव्यपितरः कव्यं पितृन् प्रति प्रापयन्ति। यदि पितरः कालान्तरेण देवयोनिं प्राप्नुवन्ति तदा तेभ्यः कृतं श्राद्धम् अमृतरूपेण तैः प्राप्यते।

अस्मिन् विषये मनुना उक्तं यत्-

यद् यद् ददाति विधिवत् सम्यक् श्रद्धासमन्वितः।
तत् तद् पितृणां भवति परत्र अनन्तम् अक्षयम्।।[17]

मार्कण्डेयपुराणे वचनं प्राप्यते यत्-

नाममन्त्रस्तथा देशा भावान्तरगतानपि। प्राणिनः प्रीणयन्त्येते तदाहारत्वमागतान्।।
देवो यदि पिता जातः शुभकर्मानुयोगतः। तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति।।
मर्त्यत्वे ह्यन्नरूपेण पशुत्वे च तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेऽप्युपतिष्ठति।।

वायुपुराणे प्राप्यते यथा-

यथा गोष्ठे प्रणष्टां वै वत्सो विन्देत मातररम्। तथा तं नयते मन्त्रो जन्तुर्यत्रौवतिष्ठते।
नाम गोत्रं च मन्त्रश्च दत्तमन्नं नयन्ति तम्। अपि योनिशतं प्राप्तास्तृप्तिस्ताननुगच्छति।।[18]

अतः स्पष्टम् अस्ति यत् पितृणाम् उत्तमोत्तमगतेः प्राप्त्यर्थं श्राद्धं विधीयते।

श्राद्धं न कृते सति का हानिः भवति अथवा दोषो भवति इत्यस्मिन् विषये[19]

मनुनोक्तम् यत्।

न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः।
इन्दुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः।।

आदित्यपुराणे-

न सन्ति पितरश्चेति कृत्वा मनसि वर्तते।
श्राद्धं न कुरुते यस्तु तस्य रक्तं पिबन्ति ते।।

मार्कण्डेयपुराणे-

न तत्र वीरा जायन्ते नाऽऽरोग्यं शतायुषः।
न च श्रेयोऽधिगच्छति यत्र श्राद्धं विवर्जितम्।।

श्राद्धं कृते सति पितरः तु सद्गतिं प्राप्नुवन्ति एव, यः श्राद्धप्रदाता भवति तस्य अपि कल्याणं भवति। मासस्य अपरस्मिन् पक्षे यस्मिन् कस्मिन् अपि दिवसे श्राद्धकर्म कर्तुं शक्यते। तेन पितरः तृप्ताः भवन्ति। येन प्रशस्तासु तिथिषु श्राद्धं विधीयते। तस्मै फलविशेषस्य प्राप्तिप्रसंगे आपस्तम्बधर्मसूत्रे उक्तम् - "प्रथमेऽहनि क्रियमाणे स्त्रीप्रयमपत्ये जायते।।" अर्थात् प्रतिपदी यः श्राद्धं करोति तस्य प्रायेण स्त्रियो जायन्ते, कन्याः उत्पद्यन्ते। "द्वितीये स्तेनाः।" अर्थात् चोरपुत्राः जायन्ते। "तृतीये ब्रह्मवर्चस्विनः।।" अर्थात् ब्रह्मतेजयुक्ताः पुत्राः जायन्ते। "चतुर्थे क्षुद्रपशुमान्।।" अर्थात् चतुर्थे दिवसे श्राद्धे कृते सति क्षुद्रपशूनां प्राप्तिर्भवति, समृद्धिः भवति। "पञ्चमे पुमांसो बह्वपत्यो न चाऽनपत्यः प्रमीयते।।" अर्थात् पुत्रा एव उत्पद्यन्ते, अनेके पुत्राः भवन्ति, अपि च श्राद्धकर्ता मत्युपर्यन्तम् पुत्रवान् भवति। "षष्ठेऽध्वशीलोऽक्षशीलश्च।।" अध्वशीलः अर्थात् देशाटनकर्ता, अक्षशीलः अर्थात् कितवः पुत्राः भवन्ति। "सप्तमे कर्षे राद्धिः।।" कर्षः नाम कृषिः, कृषिकार्ये वृद्धिः भवति। "अष्टमे पुष्टिः।।" ये पुष्टिं कामयन्ते तैः अष्टमे दिवसे श्राद्धं कर्त्तव्यम्। "नवम् एकखुराः।।" अश्वादीनां प्राप्तिः नवमे दिवसे श्राद्धे कृते सति भवति। "दशमे व्यवहारे राद्धिः।।" अर्थात् वाणिज्ये, सिध्यर्थम् दशमे दिवसे श्राद्धं करणीयम्। "एकादशे कृष्णयज्ञं त्रपुसीसम्।।" अर्थात् लौहस्य प्राप्तिः। "द्वादशे पशुमान्।।" अर्थात् बहुभिः पशुभिः युक्तो भवति। "त्रयोदशे बहुपुत्रो बहुमित्रो दर्शनीयापत्यो, युवमारिणस्तु भवन्ति।।" अर्थात् अनेके पुत्राः, मित्राणि च भवन्ति किन्तु पुत्रा अल्पायुयुक्ताः भवन्ति। "चतुर्दशे आयुधे राद्धिः।।" अर्थात् रणक्षेत्रे सफलतां लभते। "पञ्चदशे पुष्टिः।।" समृद्धिनिमित्तं पञ्चदश्यां श्राद्धम् कर्तव्यम्।

याज्ञवल्क्येनापि **श्राद्धप्रदानस्य फलमुक्तम्-**

**आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च।**
**प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः।।**[20]

**फलविशेषम् अपि याज्ञवल्क्येन उक्तम्-**

**कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि।**
**द्यूतं कृषिं वाणिज्यां च द्विशफैकशफांस्तथा।।**
**ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरूप्ये सकुप्यके।**
**ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा।।**[21]

श्राद्धप्रदानेन न केवलं पितृणां तृप्तिः भवति, श्राद्धकर्तुः अपि सर्वविधसमृद्धिः भवति। अतः समस्तजगतः तृप्त्यर्थं श्राद्धम् अवश्यमेव विधातव्यम्।

**ब्रह्मपुराणे-**

**यो वा विधानतः श्राद्धं कुर्यात् स्वविभवोचितम्।**
आब्रह्मस्तम्बपर्यन्तं जगत् प्रीणाति मानवः।।
ब्रह्मेन्द्ररूद्रवासत्यसूर्यानलसुमारुतान्।
**विश्वेदेवान् पितृगणान् पर्यग्निमनुजान् पशून्।।**
**सरीसृपान् पितृगणान् यच्चान्यद्भूतसंज्ञितान्।**
**श्राद्धं श्रद्धान्वितः कुर्वन् प्रीणयत्याखिलं जगत्।।** इति।।

**सन्दर्भ :**

1. विष्णुपुराण
2. महाभारत शांतिपर्व 264-26
3. मनु 3/70
4. तै.आ.10/63
5. मनु 2/12
6. आचार/102
7. मनु3/70
8. 3/72
9. 3/73
10. 3/74
11. आप.2/419
12. 3/80
13. P.74 श्राद्धप्रकरण
14. आचर 217
15. मनु 3/122
16. मनु 3ध284
17. मनु 3/275
18. वायुपुराण उपोदघात् पा. 83/119-20
19. मनु- 5/123-8
20. आयुः प्रज्ञाः- अचार-270
21. कन्यां कथावेदि-262

वेद-पुराण-साहित्य-साहित्यशास्त्र-व्याकरण-दर्शन-ज्योतिष-भारतीय संस्कृति आदि विविध विषयों पर विषय-विशेषज्ञ मूर्धन्य विद्वानों के शोध-आलेखों का उत्कृष्ट संग्रह

# शाश्वती

## डॉ. सन्तोष कुमार पाण्डेय स्मृतिग्रन्थ

# Śāśvatī

## Dr. Santosh Kumar Pandey Commemoration Volume



सम्पादक मंडल

शैलेश कुमार मिश्र • कंजीव लोचन

धनञ्जय वासुदेव द्विवेदी • अवधेश कुमार पाण्डेय

© **सर्वाधिकार सुरक्षित** । इस प्रकाशन के किसी भी अंश का किसी भी रूप में पुनर्मुद्रण या किसी भी विधि (जैसे- इलेक्ट्रॉनिक, यांत्रिक, फोटो प्रतिलिपि, रिकॉर्डिंग या कोई अन्य विधि) से प्रयोग या किसी ऐसे यंत्र में भंडारण, जिससे इसे पुनः प्राप्त किया जा सकता हो, सम्पादक मंडल की पूर्वलिखित अनुमति के बिना नहीं किया जा सकता है।

इस स्मृतिग्रन्थ में प्रकाशित आलेख सम्बद्ध लेखकों के निजी विचार हैं। किसी विवाद की स्थिति में उसका उत्तरदायित्व सम्बद्ध लेखक का होगा। सम्पादकगण एवं प्रकाशक इसके लिए जिम्मेदार नहीं होंगे।

**शाश्वती–डॉ. सन्तोष कुमार पाण्डेय स्मृतिग्रन्थ**

ISBN : 978-93-94829-29-9

प्रकाशक :

**चौखम्बा सुरभारती प्रकाशन**

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के 37/117 गोपाल मन्दिर लेन, पोस्ट बॉक्स न. 1129

वाराणसी 221001

दूरभाष : +91 542 2335263, 2335264

e-mail : chaukhambasurbharatiprakashan@gmail.com

website : www.chaukhamba.co.in

@chaukhambabooks

@chaukhambabooks

© सर्वाधिकार सुरक्षित

प्रथम संस्करण : 2022

₹ 4995.00

**वितरक :**

**चौखम्बा पब्लिशिंग हाउस**

4697/2 ग्राउण्ड फ्लोर, गली न. 21-ए

अंसारी रोड, दरियागंज

नई दिल्ली 110002

दूरभाष : +91 11 23286537, 41530947 (मो.) +91 9811104365

e-mail : chaukhambapublishinghouse@gmail.com

*

अन्य प्राप्तिस्थान :

**चौखम्बा संस्कृत प्रतिष्ठान**

4360/4, अंसारी रोड, दरियागंज

नई दिल्ली 110002

*

**चौखम्बा विद्याभवन**

चौक (बैंक ऑफ बड़ौदा भवन के पीछे)

पोस्ट बॉक्स न. 1069

वाराणसी 221001

मुद्रक : ए.के. लियोग्राफर, दिल्ली

# स्मृतिग्रंथ प्रकाशन समिति

**संरक्षकमण्डल**

प्रो. (डॉ.) तपन कुमार शांडिल्य

प्रो. (डॉ.) जय नारायण पाण्डेय

प्रो. (डॉ.) नन्हकू राम दूबे

डॉ. नीलिमा पाठक

डॉ. राम कुमार पाठक

डॉ. नमिता सिंह

**परामर्शदात्री–समिति**

प्रो. (डॉ.) हरिदत्त शर्मा

प्रो. (डॉ.) अर्कनाथ चौधरी

प्रो. (डॉ.) सन्तोष कुमार शुक्ल

प्रो. (डॉ.) श्रीप्रकाश पाण्डेय

प्रो. (डॉ.) धनञ्जय पाण्डेय

प्रो. (डॉ.) उपेन्द्र कुमार त्रिपाठी

प्रो. (डॉ.) विष्णुकान्त पाण्डेय

प्रो. (डॉ.) प्रसून दत्त सिंह

प्रो. (डॉ.) रत्नेश विष्वक्सेन

प्रो. (डॉ.) बलराम शुक्ल

प्रो. (डॉ.) प्रयाग नारायण मिश्र

डॉ. शैलेश कुमार तिवारी

डॉ. शरदिन्दु कुमार त्रिपाठी

**प्रधान सम्पादक**

डॉ. शैलेश कुमार मिश्र

**प्रबन्ध सम्पादक**

डॉ. कंजीव लोचन

डॉ. अवधेश कुमार पाण्डेय

**सम्पादक**

डॉ. धनञ्जय वासुदेव द्विवेदी

**प्रकाशनसमिति**

श्री कमलेश वैद्य

श्री मलय समीर

श्री सतीश कुमार

श्री संजय कुमार

श्रीमती नमिता तिवारी

डॉ. किरण झा

डॉ. शालिनी लाल

डॉ. अभय कृष्ण सिंह

डॉ. विनय भरत

डॉ. अनिर्बान साहू

डॉ. अभय सागर मिंज

श्री मनोजीत प्रसाद

डॉ. जितेश पासवान

श्री जगदम्बा सिंह

श्री राहुल कुमार

सुश्री सोनी उराँव

श्रीमती श्वेता भारती

श्री गोपाल कृष्ण दूबे

श्री अमिताभ कुमार

## धर्मशास्त्रविमर्श


81. धर्मशास्त्र में वर्णित भारतीय न्याय प्रक्रिया- प्रो. सन्तोष कुमार शुक्ल 547
82. स्मृति निरूपित दण्ड विधान एवं उसकी प्रासङ्गिकता- डॉ. हिमांशुशेखर त्रिपाठी 557
83. अविभाज्यधनानि- डॉ. मीनाक्षी मिश्रा 563
84. विश्व में मनुस्मृति की प्रासंगिकता- डॉ. अवधेश कुमार पाण्डेय 572
85. स्मृतियों में शैक्षिक पर्यावरण- डॉ. प्रबोध कुमार पाण्डेय 575
86. धर्मशास्त्रों में आपद्धर्म-रश्मि मिश्रा 578


## ज्योतिषशास्त्रविमर्श


87. ज्योतिष का वेदाङ्गत्त्व : एक अनुशीलन- प्रो. भारतभूषण मिश्र 592
88. वास्तुशास्त्रसम्मत द्वारविन्यास- डॉ. अशोक थपलियाल 599
89. गणित की उन्नति में लीलावती का अवदान- डॉ. सुनील मुर्मू 608
90. Astrology and human health (According to Prasnamarga)- Dr. Jitesh Paswan 612


## साहित्यविमर्श


91. काव्यकृति के संदर्भ में - कालिदास तथा कबीरः एक विमर्श- प्रो. कमलेशकुमार छ. चोकसी 616
92. अभिज्ञानशाकुन्तल : पाठभेद-जनित दृश्यपरिवर्तन- प्रो. वसन्तकुमार म. भट्ट 624
93. संस्कृत साहित्य में प्रेमतत्त्व- प्रो. रमाकान्त पाण्डेय 635
94. किं श्रीहर्षो मिथिलानिवासी?- डॉ. उदयनाथझा 'अशोकः' 666
95. Cultural and Political Elements Noticed in the *Prasannarāghava*- Dr Kameshwar Shukla 673
96. कुमारसम्भव-वामनपुराणयोः कथासाम्यम्- डॉ. शरदिन्दुकुमारः त्रिपाठी 680
97. कालिदास के काव्यों में संस्कार : वर्तमान उपादेयता- डॉ. रुबी 688
98. संस्कृत साहित्य में मानव के समग्र विकास की अवधारणा- डॉ. शशिकांत पाण्डेय 697
99. साहित्यस्य लोकमङ्गलकारिता- डॉ. शैलेश कुमार मिश्र 701
100. कालिदास की पर्यावरण चेतना : अभिज्ञानशाकुन्तल के आलोक में- डॉ. श्याम कुमार झा 711
101. शुकनासोपदेश की साम्प्रतिक प्रासंगिकता- प्रमोद कुमार 720
102. मुद्राराक्षस में मंच्यन्तर कथन- डॉ. उषा किरण 723
103. कुमारसंभवम् महाकाव्य में करुण रस का विवेचन- डॉ. हिमावती बिन्हा 727
104. कालिदास का चित्रकला-वैदुष्य- डॉ. लाडली कुमारी 733
105. कालिदासीय काव्यों में बिम्ब-विधान- डॉ. धनंजय कुमार मिश्र 738
106. मेघे माघे गतं वयः- डॉ. धनञ्जयवासुदेवो द्विवेदी 748
107. मृच्छकटिक में स्त्री चरित्र- डॉ. मनीषा कुमारी पाण्डेय 762
108. चारुदत्तमृच्छकटिकयोः आधाराधेयत्वम्-डॉ. सन्तोष कुमार पाण्डेय 766
109. अश्वघोष के काव्यों में योग का स्वरूप- डॉ. श्रीमित्रा 769
110. कारुण्यं भवभूतिरेव तनुते- डॉ. शिशिर कुमार पाण्डेय 772

# अविभाज्यधनानि

डॉ. मीनाक्षी मिश्रा

भारतवर्षे विचारितेषु विभिन्नेषु शास्त्रेषु धर्मशास्त्रस्य प्रामाण्यं प्राशस्त्यञ्च सुविदितचरम्। वैदिककालादनन्तरं प्रादुर्भूतेषु त्रिविधेषु स्मृतिसूत्रनिबन्धात्मकेषु धर्मशास्त्रसाहित्येषु प्रामुख्येनैवाचार-व्यवहार-प्रायश्चित्तविषया विचारिताः दृश्यन्ते।

आचारभागे **वर्णधर्माश्रमधर्मवर्णाश्रमधर्मसाधारणधर्माणां , व्यवहारभागे गुणधर्माणां , प्रायश्चित्तभागे च निमित्तधर्माणां** विचारः कृतो वर्तते। **गुणधर्ममध्ये अभिषेकादिगुणयुक्तस्य राज्ञो धर्मोऽन्तर्भवति। अतो** गुणधर्मो राजधर्म एव। राज्ञः प्रजापालनं परमो धर्मः। दुष्टानां निग्रहं विना प्रजापालनं सम्यक् कर्तुं न शक्यते। दुष्टपरिज्ञानं विना च तेषां निग्रहो वा कथं सम्भवेत्। अतस्तत् परिज्ञानं व्यवहारं विना न सम्भवति। अतो राज्ञो धर्मेषु व्यवहारं विना न सम्भवति। अतो राज्ञो धर्मेषु व्यवहारदर्शनं मुख्यं भवति। उक्तञ्च-

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिव।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम्।।[1]

मनूपदिष्टादस्माद् वचनाद् व्यवहारान् स्वयं सम्भैः परिवृतोन्वहं पश्येत्। याज्ञवल्क्योक्तवचनाद् व्यवहारदर्शनं राज्ञः परमकर्तव्यत्वेन परिगणितं भवति। स च व्यवहारः कीदृशः, किं तस्य लक्षणं, कानि च तस्य पदानि इत्यादिनि मनुयाज्ञवल्क्यादिभिः स्व-स्मृतिषु प्रतिपादितानि। मनूक्त-अष्टादशव्यवहारपदेषु दायभागोऽन्यतमः।

धर्मशास्त्रे व्यवहारः वादि-प्रतिवादिकर्तृकविवादस्यार्थे व्यवह्रियते। विधिवाचको व्यवहारः, कौटिल्यार्थशास्त्र-मनुस्मृति-याज्ञवल्क्यस्मृति-शुक्रनीति-कामन्दकीयनीतिसार-नीतिवाक्यामृतादिग्रन्थेषु व्यवहारशब्दो विध्यर्थे रूढः। अत एव व्यवहारन्यायालयादीनां समुल्लेखः। **व्यवहारमयूखे** व्यवहारलक्षणं प्रतिपादितं यथा-

स्मृत्याचारव्यपेतेन मार्गेणाऽऽधर्षितः परैः।
आवेदयाति यद्राज्ञे व्यवहारपदं हि तत्।।[2]

अस्यायं भावः यत् स्मृतिप्रतिपादित-आचाररहितेन मार्गेण कार्येण उपायेन वा परैः, अन्यैः आधर्षितः तिरस्कृतः प्रताडितो वा जनो यद् राज्ञे न्यायधीशाय न्यायप्राप्त्यर्थं वेदयति याचते तद् व्यवहारवाच्यम्।

अमरकोषे व्यवहारलक्षणम्-

विवादः व्यवहारः स्यात्।[1]

विरुद्धो वादः विवादः।

कात्यायनः-

'वि' नानार्थे 'अव' सन्देहे 'हरणं' हार उच्यते।

नानासन्देहहरणाद्व्यवहार इति स्मृत इति।।[4]

नानाभेदेषु विभक्तेषु व्यवहारपदेषु मनूक्ताष्टादशव्यवहारपदेषु च 'विभागश्च' इति पदेन दायभागोऽन्यतमः। अयं दायभागः पितृधनस्य तत्सम्बन्धीयस्य वा धनस्य तत्सम्बन्धीयेषु विभाग एव। उक्तश्च विज्ञानेश्वरेण यत्-

दायशब्देन यद्धनं स्वामिसम्बधादेवान्यस्य स्वं भवति तदुच्यते'।[5]

नारदेन उक्तश्च-

विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।

दायभाग इति प्रोक्तं तद्विवादपदं बुधैः।।[6] इति

विभागेन एव स्वत्वमागच्छति। तेन च यथेष्टविनियोगार्हत्वम्। मनुश्च ''पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया''।[7] इत्युक्त्वा विभागस्य महत्त्वं प्रतिपादयति। अतस्तस्मादस्त्येव दायभागस्य महद् योगदानामिति विपश्चितामैकमत्यम्। विज्ञानेश्वरमतेन स च दायः द्विविधः। अप्रतिबन्धः सप्रतिबन्धश्चेति।

अप्रतिबन्धदायः-

पुत्राणां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं स्वं भवतीत्यप्रतिबन्धो दायः।

सप्रतिबन्धदायः -

पितृव्यभ्रात्रादीनान्तु पुत्राभावे स्वाम्यभावे च स्वं भवतीति सप्रतिबन्धो दायः इति।

विभागलक्षणम् - ''विज्ञानेश्वरमते विभागो नाम द्रव्यसमुदायविषयाणाम् अनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनमिति विभागः''।[8]

जीमूतवाहनमते एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यजनं विभागः। ''विशेषेणं भजनं स्वत्वज्ञापनं वा विभाग''[9] इति।

अस्माकमस्मिन् शास्त्रपरम्पराप्रचलितवाहिनिसंसारे शास्त्रणामनुसारं धनसमूहो विभाज्याविभाज्यत्वेन विभज्यते। तस्मादेव धनसमूहाद् अविभाज्यधनविषये विचारोऽत्र क्रियते। अविभाज्यधनविषये याज्ञवल्क्यमतं दीयते यथा-

पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम्।

मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्।।[10]

क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्तु यः।

दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव वा।।[11] इति

याज्ञवल्क्यवचनाभ्यां मातापित्रोर्द्रव्याविरोधेन, मैत्रेण, उद्वाहेन पूर्वापहृतोद्धृतेन, क्रमादभ्यागतेन, विद्यादिना

च यद्धनं स्वात्मनार्जितं तत्सर्वमविभाज्यमेव। अत धनेषु पूर्वं क्रमागतं भूम्यादिकं पूर्वनष्टं यदि कश्चन उद्धरति, तर्हि, उद्धर्त्रे चतुर्थांशमुद्धारं दत्त्वावशिष्टं सर्वे समं विभजेरन्निति।

पूर्वं नष्टां तु यां भूमिमेकश्चेदुद्धरेत्क्रमात्।
यथाभागं लभन्तेऽन्ये दत्त्वांशं तु तुरीयकम्।।[12]

अत्र शङ्ख वचनोदाहरणेन विज्ञानेश्वरजीतमूतवाहनयोरैकमत्यम्।

शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत्।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः।।[13]

इति नारदवचनेनापि युद्धेन, भार्याग्रहणेन, विद्यया, वेदाध्ययनेनाध्यापनेन वेदार्थव्याख्यानेनार्जितानि धनान्यप्यविभाज्यानीति सुस्पष्टम्। एतसर्वं पितृद्रव्यानुपधातात्।

पितृद्रव्याविरोधेन यत्किञ्चित्स्वयमर्जितम्।
**मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्।।**[14]

**इति याज्ञवल्क्यस्मरणात् पितृद्रव्याविरोधेन स्वकीयश्रमेणोपार्जितधनविषयकम्।**

**विभागात्पूर्वं वस्त्रवाहनालङ्कारादयो येन व्यवहृतः स एव तस्य, नैतदन्यैर्विभाज्यम्। परन्तु यदि** अधिकं स्यात्तर्हि विभक्तव्यमेव। विषयेऽस्मिन् मनोर्वचनमस्ति-

वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः।
योगक्षेमं प्रचारश्च न विभाज्यं प्रचक्षते।।[15]

इति वचनात् पूर्वोक्तवस्त्रादीनि योगशब्देन श्रौतस्मार्ताग्निसाध्यम् इष्टकर्म लक्ष्यते। क्षेमशब्देन बहिर्वेदिदानतडागारामनिर्माणादिकर्म लक्ष्यते। प्रचारशब्देन गृहारामादिषु प्रवेशनिर्गममार्गो बोध्यते। ते सर्वेऽप्याविभाज्याः।

वस्त्रालङ्कारशय्यादि पितुर्यद्वाहनादिकम्।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे समर्पयेदिति।।[16]

बृहस्पतिवाक्यात् पितृधृतवस्त्राणि तस्योर्ध्वं विभजतां श्राद्धभोक्त्रे देयानीति ज्ञायते। जीवति पत्यौ स्त्रीभिर्धृता अलङ्कारा अविभाज्याः। यो यया धृतः स तस्या एव।

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत्।
न तं भजेरन्दायादा भजमानाः पतन्ति ते।।[17] इति

**मनुवचनादेव पूर्वोक्तानामविभाज्यत्वं सिद्ध्यति, तेषामभावे प्रतिषेधश्रवणात्। द्रव्येण विषमाणि चेद्विभागेऽधिकं ज्येष्ठस्येति मनुना निगदितम्-**

अजाविकं सैकशफं न जातु विषमं भजेत्।
अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते।।[18]

इति स्त्रियः दास्यादयश्च विषमाश्चेत् पर्यायेण कर्म कारयितव्यम्। उदकमुदकधारः कूपादि, तच्च विषममूल्यद्वारेण न विभाज्यमपितु पर्यायेणोपभोक्तव्यम्। अवरुद्धास्तु पित्रा स्वरिण्याद्याः समा अपि पुत्रैर्न विभाज्या भर्त्रा प्रीतेन यद्दत्तमिति नारदवचनात् स्थावराद् व्यतिरेकेण सर्वं प्रीतिप्रसादादिकं धनं भर्त्रा

पित्रादिना विभाज्यामिति विज्ञानेश्वरः।

जीमूतवाहनस्यापि मतानि प्रायशः विषयेऽस्मिन् विज्ञानेश्वरमततुल्यानि सन्ति।

यदि सर्वसाधारणीभूतं द्रव्यमाकुलीकृत्य कश्चन किञ्चिद्धनमर्जयति तत्रेतरेषां भ्रातॄणां भागः।

पैतामहञ्च पित्र्यञ्च यच्चान्यत्स्वयमर्जितम्।
दायादानां विभागे तु सर्वमेतद्विभज्यते।।[19]

कात्यायनवचनादस्मात् पैतामहादिधनव्ययार्जिते धने दायादानां समेषामधिकारः प्रदर्शितः, तस्य धनस्य साधारणधनत्वात्। तत्रापि यस्य यावतोंऽशस्य स्वल्पस्य महतो वोपघातः तस्य तदानुसारेण भागकल्पना कार्या तत्र पुनरर्जयितुरंशद्वयमन्येषां स्वभागानुसारमिति।

साधारणं समाश्रित्य यत्किञ्चिद् वाहनायुधम्।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः।।
तत्र भागद्वयं देयं शेषास्तु समभागिनः।[20]

इति व्यासवचनानुसारं प्रतिपादितं यत् साधारणद्रव्येणार्जितस्य धनं सर्वैर्विभक्तव्यमिति।

पुनश्च यदि कस्यचन जनस्य द्वौ पुत्रौ आस्ताम्, तयोः कश्चन स्वधनव्ययाद् विद्याध्ययनार्थं गृहं परित्यक्तवान्। तदानीं यो गृहेऽऽसीद्, यद्यध्ययनार्थं गतस्य भ्रातुः कुटुम्बं विभृयादर्थाद् विद्यामभ्यसतो भ्रातुः कुटुम्बं स धनव्ययं कृत्वा वर्धयति, तदा तद्विद्योपार्जितधने तस्याप्यधिकारः। यथोक्तं नारदेन-

कुटुम्बं विभृयाद् भ्रातुर्यो विद्यामधिगच्छतः।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्।।[21]

किन्तु पित्र्यपदं साधारणधनपरत्वेऽपि यदि केनापि तदनाश्रित्य धनमर्जितं तर्हि वैद्योऽविद्याय अनिच्छन्न दद्यात्, वैद्याय विद्याविशिष्टाय विदुषे साधारणमन्तरेणाप्यर्जितं दद्यात्।

वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात्।
पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदर्जितम्।।[22] इति

नारदवचनात् श्रूयते। अतः साधारणद्रव्यं समाश्रित्य व्ययीकृत्यार्जितविद्याधने विद्यानुपालितानां यवीयसां भ्रातॄणां भागो नाविद्यापालितानामिति जीमूतवाहनदिशा कश्चन विशेषः।

यत्किञ्चित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति।
भागो यवीयसां तत्र यदि विद्यानुपालितः।।[23] इति।।

मनुवचनात् पुत्रार्जितेऽविदुषामधिकारः। ज्येष्ठार्जिते पुनर्विदुषामधिकारः इत्ययं भेदः। अपरञ्च प्रकारान्तरेण यानि शौर्यप्रसादलब्धधनानि सन्ति, तान्यप्यविभज्यानि। अतो विषयमेनमाधारीकृत्य कात्यायनस्य कानिचिद्वचनानि दृष्टान्तत्वेन दीयन्ते-

आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते।
तस्मिन् कर्मणि तुष्टेन प्रसादः स्वामिना कृतः।।[24]
तत्र लब्धन्तु यत्किञ्चिद्धनं शौर्येण तद्भवेत्।
ध्वजाहृतं भवेत् यत्तु विभाज्यं नैव तत्स्मृतम्।।[25]

संग्रामादाहृतं यत्तु विजित्य द्विषतां बलम्।
स्वाम्यर्थे जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते।।
वैवाहिकन्तु तद्विद्याद्भार्यया यत् सहागतम्।।[26]

इत्येतानि पूर्वोक्तानि धनान्याविभाज्यानीति जीमूतवाहनस्याशयः।

अत्र विषयेऽस्मिन् स्त्रीधनविभागक्रमपरके प्रसङ्गे विज्ञानेश्वरजीमूतवाहनयोर्मतानि प्रायशः सादृश्यपरकाणीति परिलक्ष्यते। परन्तु कुत्रचित् स्थलविशेषे जीमूतवाहनमतमधिकरुचिकरं क्वचिद् वा विज्ञानेश्वरस्येति वक्तुं शक्यते।

पुनश्चापि कृत्यकल्पतरौ पित्रादिक्रमागतं द्रव्यं विभागकाले विच्छिन्नभागविभक्तः सन्नितरदायादानुमतः 'स्वशक्त्या यदभ्युद्धरेत्' स्वीकुर्यात् स तद्विभक्तजदायादेभ्यः पुनर्विभागकाले न दद्यादिति विश्वरूपः। क्रमादभ्यागतं पितृक्रमादागतं यत्किञ्चिदन्यैः हृतम् , असामर्थ्यादिना पूर्वपुरुषेणानुद्धृतं यो द्रव्यमंशिनां मध्ये एक एवोद्धरति, तदंशयन्तरेभ्यो न दद्यात्। तत्र चाभ्यन्तराणामनुज्ञेयेति। अत्र चेदभिमतं, यदसाधारणधनेनैव ग्रासाच्छादनाद्युपयोगं कृत्वा समाधिगतविधिः साधारणधनाश्रयेण विद्यमानं धनं प्राप्नोति, तदा अविद्याय न देयम् , साधारणधनाश्रयेण तु विद्यार्जितमविद्यायाऽपि देयम्। यदा तु विद्यार्जनकाले साधारणधनोपयोगेऽपि विदुषा न कस्यचिद्धेयम्, किन्तु विदुष एव तद्धनम्।[27] पितृद्रव्यार्जित-स्वाविभाज्यत्वमुक्त्वा पृथग्विद्यालब्धस्यापि व्यासेन विभाज्यत्वप्रतिपादनात्। योगक्षेमप्रचारादिकमप्यविभाज्यत्वेन गृहीतमनेन। एतत्परिभाषितविद्या शौर्यादिधनव्यतिरिक्तविद्याशौर्यादिधनाभिप्रायेण द्रष्टव्यमिति अत्रापवादमाह व्यासः।[28]

शौर्यादिसाधारणोपायेनापि चेत्साधारणक्लेशेनार्जयति तदाऽर्जको द्व्यंशभागित्यर्थः। ननु साधारणधनाश्रयेणापि विद्याशौर्यादिना यदर्जितं तदविभाज्यामिति प्रागुक्तमनेन विरुद्धयतीति चेन्न। तस्य कात्यायनादिविद्याशौर्यादिपरत्वादस्य तु तदितरप्रकारविद्योपष्टम्भमात्रपरत्वादिति स्त्रीधनविभागप्रसङ्गक्रमः।

पुनरपि महामहोपाध्यायो[29] वाचस्पतिमिश्रोऽपि प्रसङ्गेऽस्मिन् विज्ञानेश्वरमतं स्वीकरोति।

अपरश्चापि नीलकण्ठभट्टो[30] मिताक्षरां सम्मनुते। अपि च बालम्भट्टस्य[31] मतानुसारमेतदेवास्ति यद् अविभाज्यधनेषु पितृद्रव्याविरोधेनेत्यस्य सर्वशेषत्वादेव यथा तद्विरोधेनोपार्जितानां विभाज्यत्वं तथा मैत्राद्यन्यत्वात्पितृद्रव्यविरोधेन प्रतिग्रहोपार्जितस्यापि न विभाज्यत्वमित्यर्थः। तस्य तदशेषत्वेन स्वातन्त्र्ये तु तत्रापि विरोधेनोपार्जिते विभाज्यत्वापत्तिरिति भावः।

ननु तथैवास्तु इति तत्र इष्टापत्तिरिति माऽस्तु तस्य तच्छेषत्वमिति स्वातन्त्र्यमेवास्तु ब्राह्मणवसिष्ठन्यायेन तस्य मित्रादिभिन्नपरत्वाभावाद् द्रढयन्नुक्तम्। तस्य तदशेषत्वे किञ्चित्पदादिस्वारस्याद्यत्तविरोधेनार्जितं तत्सर्वमविभाज्यमिति।

ननु श्रुत्यादीनां पूर्वपूर्वप्राबल्यस्योक्तत्वेन वचनादाचारस्य दुर्बलत्वेनेदमयुक्तम्, आचारेण स्मृतिकल्पनेऽपि क्लृप्तस्मृतेर्झटित्युपपत्तेः प्राबल्यमेवेति चेन्न आशयानवबोधात्। न केवलमाचारविरोधोऽपितु मैत्राद्यन्तर्गतविद्यालब्धविषये स्मृतिविरोधोऽपीत्याह, विद्याध्ययनकुर्वतो भ्रातुर्योऽस्य भ्राता तस्य कुटुम्बं पोषयति सोऽश्रुतोऽपि सन् वेदशास्त्राद्यध्ययनरहितो मूर्खोऽपि सन् तस्माद्विद्याधनात्तदर्जितविद्यया

लब्धधनाद्भागमंशं लभेतेत्यर्थः। यदि कथमप्यर्जितस्य विद्याधनस्य तत्त्वेनाविभाज्यत्वं मूलाभिमतं स्यात्तदा तद्धेतुकविभागकथनं नारदीये विरोधः क्रियते। तस्मात्तस्य स्वतो तादृशस्य विभाज्यत्वेऽविभाज्यत्वे किन्तु अविरोधेऽविभाज्यत्वं विरोधे विभाज्यत्वेन विरोधरूपमेव नारदेन हेतुत्वेनोक्तमिति सिद्धान्ते एकवाक्यता सिद्धा। मूलेऽपित्रीत्युपलक्षणम्। किन्तु यदि स्वभाविकी विद्याधनांशप्राप्तिर्नारदादिभिर्मता भवेत्तर्हि तस्य हेतुत्वोक्तिरनर्थका स्यात्। एवं च विद्याधनस्य यथा कथञ्चिदर्जितस्य न स्वतो विभागार्हता। अन्यथा पितृद्रव्यविरोधेनार्जितस्याप्यविभाज्यत्वेऽत्राप्यविभाज्यत्वमेव उचितमिति विभागकथनस्यैवासङ्गतिरिति भावः। अत एव कात्यायनेनोक्तम्-

नाऽविद्यानां तु वैद्येन देयं विद्याधनात्किञ्चित्।
समविद्याधिकानां तु देयं वैद्येन तद्धनम्।।[32]

अयं च सिद्धान्तोऽविभाज्यत्वेन प्राप्तस्यापवादः। एवं च **विद्याधनमन्यदपीति नारदादिविरोधो व्याख्यातुरिति बोध्यम्**। तथा च **पित्रादिद्रव्यविरोधे या विद्या तद्भिन्ना लब्धा यत् प्राप्तं धनं तद्विद्याप्राप्तं धनं नान्यत्** ईदृशमेवाविभाज्यम्, अतोऽन्यथा तु तद्विद्याधनमेव नेति तद्विभाज्यमेवेति भावः। अनुपघ्नन्नित्यत्र विभक्तविपरिणामेन तदनुपघ्नता यत् विद्याया रूपं लब्धं तत्पूर्वं चोभयमपि क्षयादेभ्यो न देयमित्यर्थेन पितृद्रव्यविनाशरूपविरोधाभावेन यद्विद्यालब्धं श्रमलब्धं च तदविभाज्यमिति सिद्धम्। मैत्रादिगणान्तर्गतविद्याधनस्य तथात्वात्तस्योपलक्षणत्वेन मैत्रदीनापि तथात्वमाविष्कृतमिति भावः।

मनुना-

अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत्।
स्वयमीहितलब्धन्तन्नाकामो दातुमर्हति।।[33]

अत्र यत्किञ्चन्मनोर्विपरीतं तस्यैव तात्पर्यम्। पितेव पालयेत्पुत्रानिति मानवात्पितापुत्रवद्भावे तद्वज्ज्येष्ठधने कनिष्ठाधिकारः। पित्रार्जितेऽविदुषामपि ज्येष्ठार्जिते तु विदुषामेवेति विशेषः। 'इदं च पितरि प्रेते इति ज्येष्ठ' इति 'तात्पर्यम्' इति विद्यानुपालित इति चोक्त्या लभते। तस्मादविभक्तार्जितत्वमात्रेण विभक्तमात्रन्तरस्य भवतीत्युक्तम्। तथा च गौतमः-

स्वयमार्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्।[34]

नारदेनाप्युक्तम्-

वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात्।
पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदर्जितम्।।[35]

पितरि मृते ज्येष्ठेनार्जितान्मैत्रादिकाद् भागो कनीयसो लभन्ते। यदि ते विद्वांस इत्यर्थः। अत एव पितृद्रव्याविरोधेनापि ज्येष्ठो विद्यादिना धनमर्जयति तत्र कनिष्ठानामपि भागो यदि ते विद्याभ्यासरता इति कल्पतरुमेधातिथिप्रभृतयः, एवं प्रागुक्तादेरपि सिद्धान्ते तदपवादो बोध्यते। यथा चोक्तम्-

विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्रमौद्वाहिकं चैव माधुपर्किकमेव च।।[36]

व्यासेनोक्तम्-

लब्धधनाद्भागमंशं लभेतेत्यर्थः। यदि कथमप्यर्जितस्य विद्याधनस्य तत्त्वेनाविभाज्यत्वं मूलाभिमतं स्यात्तदा तद्धेतुकविभागकथनं नारदीये विरोधः क्रियते। तस्मात्तस्य स्वतो तादृशस्य विभाज्यत्वेऽविभाज्यत्वे किन्तु अविरोधेऽविभाज्यत्वं विरोधे विभाज्यत्वेन विरोधरूपमेव नारदेन हेतुत्वेनोक्तमिति सिद्धान्ते एकवाक्यता सिद्धा। मूलेऽपित्रीत्युपलक्षणम्। किन्तु यदि स्वभाविकी विद्याधनांशप्राप्तिर्नारदादिभिर्मता भवेत्तर्हि तस्य हेतुत्वोक्तिरनर्थका स्यात्। एवं च विद्याधनस्य यथा कथञ्चिदर्जितस्य न स्वतो विभागार्हता। अन्यथा पितृद्रव्यविरोधेनार्जितस्याप्यविभाज्यत्वेऽत्राप्यविभाज्यत्वमेव उचितमिति विभागकथनस्यैवासङ्गतिरिति भावः। अत एव कात्यायनेनोक्तम्-

नाऽविद्यानां तु वैद्येन देयं विद्याधनात्किञ्चित्।
समविद्याधिकानां तु देयं वैद्येन तद्धनम्।।[32]

अयं च सिद्धान्तोऽविभाज्यत्वेन प्राप्तस्यापवादः। एवं च विद्याधनमन्यदपीति नारदादिविरोधो व्याख्यातुरिति बोध्यम्। तथा च पित्रादिद्रव्यविरोधे या विद्या तद्भिन्ना लब्धा यत् प्राप्तं धनं तद्विद्याप्राप्तं धनं नान्यत् ईदृशमेवाविभाज्यम्, अतोऽन्यथा तु तद्विद्याधनमेव नेति तद्विभाज्यमेवेति भावः। अनुपघ्नन्नित्यत्र विभक्तविपरिणामेन तदनुपघ्नता यत् विद्याया रूपं लब्धं तत्पूर्वं चोभयमपि क्षयादेभ्यो न देयमित्यर्थेन पितृद्रव्यविनाशरूपविरोधाभावेन यद्विद्यालब्धं श्रमलब्धं च तदविभाज्यमिति सिद्धम्। मैत्रादिगणान्तर्गतविद्याधनस्य तथात्वात्तस्योपलक्षणत्वेन मैत्रदीनापि तथात्वमाविष्कृतमिति भावः।

मनुना-

अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत्।
स्वयमीहितलब्धन्तन्नाकामो दातुमर्हति।।[33]

अत्र यत्किश्चन्मनोर्विपरीतं तस्यैव तात्पर्यम्। पितेव पालयेत्पुत्रानिति मानवात्पितापुत्रवद्भावे तद्वज्ज्येष्ठधने कनिष्ठाधिकारः। पित्रार्जितेऽविदुषामपि ज्येष्ठार्जिते तु विदुषामेवेति विशेषः। 'इदं च पितरि प्रेते इति ज्येष्ठ' इति 'तात्पर्यम्' इति विद्यानुपालित इति चोक्त्या लभते। तस्मादविभक्तार्जितत्वमात्रेण विभक्तमात्रन्तरस्य भवतीत्युक्तम्। तथा च गौतमः-

स्वयमार्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्।[34]

नारदेनाप्युक्तम्-

वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात्।
पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदर्जितम्।।[35]

पितरि मृते ज्येष्ठेनार्जितान्मैत्रादिकाद् भागो कनीयसो लभन्ते। यदि ते विद्वांस इत्यर्थः। अत एव पितृद्रव्याविरोधेनापि ज्येष्ठो विद्यादिना धनमर्जयति तत्र कनिष्ठानामपि भागो यदि ते विद्याभ्यासरता इति कल्पतरुमेधातिथिप्रभृतयः, एवं प्रागुक्तादेरपि सिद्धान्ते तदपवादो बोध्यते। यथा चोक्तम्-

विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्रमौद्वाहिकं चैव माधुपर्किकमेव च।।[36]

व्यासेनोक्तम्-

क्रमागते गृहक्षेत्रे पितृपौत्राः समांशिनः।
पैतृके न विभागार्हाः सुताः पितुरनिच्छातः।।[37]
किञ्च कात्यायनेनाप्युक्तं यत्-
दृश्यमानं विभज्यते गृहं क्षेत्रं चतुष्पदम्।।

इति तयोर्भेदेनोपादानं कृतम्। एवं व्यासवाक्येऽप्युक्ते कृतमिति बोध्यम्। अविभाज्यमस्तीति च दर्शयन्ननुक्तत्वाज्ज्येष्ठशब्दस्योपयुक्तं लक्षार्थमाह।

पितृद्रव्ये इत्यादिनाऽविभाज्यं सर्वमुक्तमिति न्यूनतापरिहाराय विभाज्यप्रकरणे एवं वक्ष्यमाणमपि स्मरति पितृप्रसादेति। अपरश्चात्र विभाज्यत्वं व्याख्यात्रा विधिनिषेधाभ्यामुक्तम्। अत्राविभाज्यस्वरूपकथनं विधिः। विभाज्यत्वनिरासो निषेधः। तथा सत्युत्तरसङ्गत्यर्थमव्यवहितफलितं प्रागुक्तमुपसंहरति।

आधुनिकहिन्दुविध्यनुसारेणापि पैतृकधनस्यानुपघातेन यत् किञ्चिद्धनमर्जितं मित्रसकाशात्, शौर्यात्, श्वशुरगृहात्, अध्ययनात्, क्लिष्टशब्दव्याख्यानात्, शिष्यात्, शास्त्रार्थात्, आर्त्विज्यात्, उत्तमवेदगानेन, स्वज्ञानप्रकटनेन, कस्यचित् सन्देहनिराकरणेन, पणपूर्वकं विद्यया द्यूतादिक्रीडया वान्यं विजित्य यल्लब्धं तत् सर्वमविभाज्यमिति।[38] पुनश्च यदि सर्वकारपक्षतः साहाय्यरूपेण किञ्चिद्धनं केनचिल्लब्धं तद् यदि सर्वेषां परिवारवर्गाणां कृते नैव दत्तं स्यात्तर्हि तत् सर्वं स्वकीयं नेतरैर्विभाज्यं भवतीति।[39]


सन्दर्भसङ्केताः

1. मनु.-8/1
2. व्यवहारमयूख-पृ0 1
3. अमरकोषः पृ.-85
4. कात्यायनः
5. या. स्मृ. मिता. पृ. 265
6. ना. स्मृ.-4/13/1
7. मनु. 9/111
8. दा.भा. समीक्षा पृ.-2
9. दा.भा. -पृ.-2
10. याज्ञ.स्मृ.-2/118
11. तत्रैव-2/119
12. दा.भा. विमर्शः-पृ.-205
13. ना.स्मृ.-4/13/6
14. या.स्मृ.-2/119
15. मनु.स्मृ.-9/219
16. दा.भा. विमर्शः-पृ.-206

Impact Factor : 7.510

ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Refereed Journal of Multidisciplinary Research*

Year-10 | Vol.-19, Part-III | January-June, 2024

Scientific Research
Educational Research
Technological Research
Literary Research
Behavioral Research

Editor in Chief
DR. RAMKESHWAR TIWARI

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

# गृहस्थधर्मविश्लेषणम्

डा .मीनाक्षी मिश्रा

धर्मशास्त्रविभाग:

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:

धर्मविमण्डितस्य हिन्दुस्थानस्य धर्मस्तु प्राणरूपेण विद्यते। श्रीमद्भागवते उक्तम् –" **वेद प्रणिहितो धर्मो** ह्यधर्मस्तद्विपर्यय:"[1]। गौतमधर्मसूत्रे **"ॐ वेदो धर्ममूलम् "**[2] धर्मस्य लक्षणं प्रतिपादितं महर्षि गौतमेन। अयं धर्मः श्रौत - स्मार्तभेदाभ्यां द्विधा विभज्यते। श्रौतधर्मे वैदिकसंहितायां ब्राह्मणग्रन्थेषु च वर्णितानां संस्काराणां वैदिक -यागानां च अन्तर्भावो भवति। स्मार्तधर्मे स्मृतिप्रोक्ता: वर्णाश्रमादिधर्मा: अन्तर्भवन्ति। ते यथा - वर्णधर्म : , आश्रमधर्म : ,वर्णाश्रमधर्मः , गुणधर्मः , निमित्तधर्मः , साधारणधर्मश्च । आश्रमा: चत्वार: सन्ति - ब्रह्मचर्य -गृहस्थ -वानप्रस्थ -संन्यासाश्रमाः। **आश्रम्यन्ति अस्मिन् इति आश्रम:।** एषु चतुर्ष्वाश्रमेषु गृहस्थाश्रमः महत्त्वपूर्णः धर्मार्थकामनां प्राप्तये। विवाहानन्तरम् आवस्थ्याधानं कृत्वा पुरुष: गृहस्थो भवति। गृहस्थाश्रमे गृहस्थः शास्त्रोक्तविधिना गृहस्थधर्मान् परिपालयेत् । द्विजः मलमूत्रादि त्यागं कृत्वा विध्यनुसारं शौचसम्पन्नो भवेत्। दन्तधावनञ्च कृत्वा स्नानादीन् समाप्य प्रातर्सन्ध्योपासनादि कार्यं कुर्यात् । गृहस्थः धर्मशास्त्रे निर्दिष्टान् स्नानोपासनविधीन् परिपाल्य स्नान-तर्पण-भोजनादिकं कुर्यात्।

सन्ध्योपासनानन्तरम् आहवनीयादौ अग्नौ अग्निहोत्रं हुत्वा ध्यानपूर्वकं सूर्यदैवतमन्त्रं जपेत्। तदनन्तरं वेदस्य अन्येषाञ्च शास्त्राणामध्ययनं कुर्यात् । योगस्य क्षेमस्य च सिद्ध्यर्थं राजादिप्रभुसमीपं गच्छेत्। अप्राप्तस्य प्रापणं योगः प्राप्तस्य परिरक्षणं क्षेमः। अतः अप्राप्तानां वस्तूनां प्राप्तये प्राप्तस्य रक्षार्थं च राज्ञः समीपं गच्छेत् । ततः मध्याह्ने स्नानादिं समाप्य शास्त्रोक्तविध्यनुसारं देवानां पितृपुरुषाणाञ्च तर्पणपूजादिकं कुर्यात् । जपयज्ञसिद्ध्यर्थं ऋग्यजुसामवेदान् अथर्ववेदस्य मन्त्रान् ब्राह्मादि-पुराणान् इतिहासमध्यात्मविद्याञ्च यथाशक्ति जपेत्।

वैश्वदेवादिबलिकर्म तर्पणश्राद्धादि स्वधातर्पणं होमं वेदाध्ययनरूपकं स्वाध्यायम्अतिथिसत्कारञ्च ऐते भूतपितृदेवब्रह्ममनुष्ययज्ञाः पञ्चमहायज्ञाः भवन्ति। एतेषां पञ्चमहायज्ञानामनुष्ठानं यथोक्त रीत्या गृहस्थ: कुर्यात्। अस्मिन् विषये भगवता मानुना प्रतिपादितं यत् -

**" वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि।**

**पञ्चयज्ञ विधानं च पंक्तिं चान्वाहिकीं गृही"**[3]॥

---

[1] श्रीमद्भागवद् - 6 /1 /44

[2] गौतमधर्म. - 1 /3 /2

[3] मनु - 3 /67

वैश्वदेवहोमानन्तरम् अवशिष्टमन्नं भूतेभ्यः बलिरूपेण दद्यात्। श्वचाण्डाल – काकेभ्यः भूमौ अन्नं निक्षिपेत् । प्रतिदिनं पितृपुरुषेभ्यः अतिथिभ्यः यथाशक्तिमन्नं समर्पयेत् । अन्नाभावे जलं दद्यात् । निषिद्धकालं विहाय साधारणकाले यदा कदाचित् - समयानुसारं स्वाध्यायं कर्त्तव्यम्। न कदाचिद् स्वस्य कृते एव अन्नं पवेत । देवादीन् उद्दिश्य अन्नं वै पचेत् इति विधिः । उक्तञ्च महर्षियाज्ञवल्क्येन –

**"अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम् ।**

**स्वाध्यायं सततं कुर्यान्न पचेदन्नमात्मने" ।।**[4]

गृहस्थः सर्वदेवेभ्यः भृतेभ्यः भुक्त्वा भोजनं कुर्यात् इति शास्त्रसम्मतम् । बाल- पितृगृहनिवासिनी कन्या-वृद्ध- गर्भिणी- रोगग्रस्तकन्या – अतिथि-भृत्यान् भोजयित्वा दम्पति शेषभुग्भवेत् । अत्र दायित्वसम्पन्नस्य गृहस्थस्य सर्वेषां कृते भरणं कर्तव्यमित्युक्तम् । द्विजातयः भोजनात्प्राक् आचमनं कुर्युः । एकस्मिनेव समये बहव अथितयः यदा समागच्छन्ति तदा वर्णक्रमेण ब्राह्मणादीन् अतिथीन् यथाशक्तिं भोजयते । सन्धाकाले यदि कश्चिद् अतिथिः आगच्छति तमपि न निराशयेत् । अपि च अन्नादिनामभावे सति माधुरेणवचनेन तोषयित्वा भूमौ तृणासनादिकं विस्तीर्य उपविष्टुं च स्थानं दद्यात् । पादप्रक्षालनार्थं ,पानार्थं जलं प्रदाय अतिथिसत्कारं कुर्यात् । सज्जनः कदाचिद् अपि यथाशक्ति सत्कारं न कृत्वा अतिथिं न निवर्तयेत् । यथा मनुस्मृतौ उक्तं -

**"तृणानि भूमिरूदकं वाक्चतुर्थी च सुनृता ।**

**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन" ।।** [5]

संन्यासिने उत्तमाय ब्राह्मचारिणे च सत्कारपूर्वकं भिक्षां दद्यात् । भोजनकाले उपस्थितान् बन्धु-सम्बन्धी – मित्रादीन् भोजयेदिति याज्ञवलक्यस्य मतम् ।

प्रतिसम्वत्सरं यदि स्नातक-आचार्य-राजा- प्रियबन्धु-जामातरः गृहमाच्छन्ति । तर्हि तेषां मधुपर्कविधिना पूजा कर्तव्या ।

वेदपारगमतिथिं भोजनादिभिः सन्तोषयन् ग्रामस्य सीमान्तं यावत् अनुव्रजेत् । ततः भोजनादीनां समाप्त्यनन्तरं सन्ध्याकाले इतिहासपुराणादि ज्ञातृणां शिष्टानां काव्यकथादि प्रवाचने चतुराणामिष्टनाम् अनुकूल – आलापकुशलरतानां बन्धुनां साहचर्येण समयमतिवाहयेत् ।

---

[4] यज्ञवल्क्यस्मृतिः - 1 /104

[5] मनुस्मृतिः - 3 /101

सायं सन्ध्योपासनं कृत्वा आह्वनीयाद्यग्नौ होमञ्च कृत्वा तस्येव अग्ने उपासना कार्या । ततः भोजनं समाप्य शयनं कुर्यात् । ब्राह्मे मुहूर्ते उत्थाय स्वकृतं कर्तव्यञ्च हितं चिन्तयेत्। यथायुक्त समयेन धर्मार्थकामानं त्यागं नैव कुर्यात् । अपि च समया- - नुसारं पुरुषार्थाः सेवितव्या : । किन्तु –

**" परित्यजेदर्थकामौ यौ स्यातां धर्म विवर्जितौ ।**

**धर्मं चाप्यसुखोदर्कं लोक सम क्रशटमेव च"[6] ।।**

विद्या-कर्म-आयु-बन्धु-धनयुक्ताश्च लोकाः क्रमशः मान्याः भवन्ति । विद्यापदेन चतुर्दशविधा पूर्वोक्ता बोध्यन्ते । कर्म श्रोतं स्मार्तञ्च । एभिः सर्वैः एकेन वा गुणेन युक्तः वृद्धशूद्र अपि मान्यः भवति । वस्तुतः विद्या युक्तः पुरुषः सर्वत्र पूज्यते । उत्तमकर्मयुक्तश्च तस्मादवरः । तस्माच्च वयः युक्तः व्यक्ति एवमेव क्रमेण बन्धुवित्तशालिनश्च क्रमशः अवराः भवन्ति ।

**" पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।**

**यत्र स्युः सो ऽत्र मानार्हः शूद्रोऽपि दशमीं गत ।। :"[7]** इति मनूक्तवचनात् विज्ञायते यत् शूद्रः वृद्धावसथायाम् एभिर्गुणैः युक्तः भवतु, केवलं वार्धक्य द्वारा युक्तो भवतु वा, सो ऽपि मान्यः। मानुस्मृतौ प्रतिपादितं यत् –

**"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।**

**स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च"[8] ।।**

वृद्ध -भाराक्रान्त - राजा-स्नातक-स्त्री-रोगी–वर–यानेषु गन्तृभ्यश्च पन्था देयः । एतेषु राजा सर्वमान्यः । राज्ञः स्नातकोऽपि अधिकमान्यो भवति ,अर्थात राजाऽपि स्नातकाय मार्गं दद्यात् । धर्मानुष्ठाननिमित्तं यज्ञानुष्ठानं वेदाध्ययनं दानञ्च ब्राहमणवत् क्षत्रियवैश्यौ कुर्याताम्। परन्तु जीविकार्जननिमित्तं दानग्रहण यजनम ध्यापनञ्च ब्राहमणस्य अधिकानि भवन्ति । क्षत्रियस्य प्रधानं कर्म प्रजापालनमस्ति । वैश्यस्य प्रधानं कर्म कुसीदकृषिवाणिज्यपशुपालनमेव । एतानि कर्माणि यथाक्रमेण क्षत्रियवैश्ययोः वृत्तये भवन्ति । शूद्रस्य प्रधानं कर्म ब्राह्मणक्षत्रियवैश्यानां सेवा । अनेन कर्मणा यदि सः जीविकार्जनं कर्तुं न शक्नोति तर्हि वणिक्वृत्या द्विजातीनां हितमाचरन् शिल्पवृत्या वा जीविकानिर्वाहं कुर्यात् । शूद्रोऽपि स्वदारनिरतः पवित्रः भृत्यपोषकः श्राद्धक्रियारतश्च भूत्वा नमस्कारमन्त्रैः पञ्चमहायज्ञानामनुष्ठानं कर्तुं शक्नोति ।

---

6 मनु. - 4 /76

7 मनु - 2 / 137

8 मनु. - 2 /138

**विष्णुस्मृतौ –**

**"पञ्च यज्ञ विधानं शूद्र स्या पि विधीयते।**

**तस्य प्रोक्तो नमस्कार: कुर्वन्नित्यं न हीयते"[9] ।।**

चतुर्थवर्णत्वेन शूद्रोऽपि स्ववर्णधर्मपालयितुमर्ह एव। अस्मिन् विषये व्यासेन प्रतिपादितं यत् –

**" शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति।**

वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना "[10] ।।

गृहस्थाश्रमः चतुर्णां वर्णानां कृते वर्तते। गृहस्थानां साधारणधर्माः ये सर्वैरपि गृहस्थैः पालनीयाः महर्षियाज्ञवल्क्येन सुष्ठु

प्रतिपादिता। ते यथा –

**"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**

**दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम्" [11]।।**

अहिंसा, सत्यम्, अस्तेयं, शौचम्, इन्द्रियनिग्रहः, दानं, दमः, दया, क्षान्ति इति एते आब्राहमण-चाण्डालं सर्वेषां साधारणधर्मसाधकाः भवन्ति। वयः- बुद्धि-धन-वचन-वेश-पाण्डित्य- कुशलकर्मणां च अनुरूपं सरलां गत्सरविहीनां च वृत्तिमाचरेत् गृहस्थः।

कीदृशस्य गृहस्थस्य श्रौतकर्मार्हता भवेत् इत्यसमिन् विषये मनुवचनमित्थं वर्तते –

**"यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये।**

**अधिकं वाऽपि विद्यते स सोमं पातुमर्हति"[12] ।।**

---

[9] विष्णुस्मृतिः - 5 / 9

[10] व्यासस्मृतिः - 1 / 6

[11] याज्ञ.स्मृतिः - 1 /122

[12] मनुस्मृतिः - 11 / 6

वर्षत्रयं तदूर्ध्वकालपर्यन्तं वा यस्य द्विजस्य भोजनाय पर्याप्तमन्नं सञ्चितमस्ति स एव सोमं पातुं शक्नोति अर्थात् सोमयज्ञे अधिकारी भवति। यः केवलमेकवर्षं यावत् अन्नसञ्च्यं करोति स सोमयज्ञस्य पूर्वकालिकी क्रियामग्निहोत्राग्रयणपशुचातुर्मास्यादि यागं कर्तुं सोमं पातुमनर्हः भवति।

नित्यानि श्रोतकर्माणि कुर्वीत गृहस्थः। प्रतिसम्वत्सरं सोमयागं, प्रत्ययनं निरुढपशुबन्धयागञ्च कुर्यात्। मनुस्मृतावुक्तं यत् -

**"इष्टीं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये।**

**क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसंभवे"**[13]॥

प्रतिवर्षं नवसस्योत्पन्ने काले आग्रयणेष्टिं-चातुर्मास्योष्टिं च कुर्यात्। सोगयागानुष्ठाने असमर्थे सति प्रायश्चित्तस्वरूपं वैश्वनरेष्टिं कुर्यात् परन्तु सत्सु अपि दृष्ट्येषु सोमयज्ञादि करणे सामर्थ्ये सति गौणकल्पे न किमपि काम्यं कर्म कुर्यात्। यज्ञानुष्ठाननिमित्तं शूद्रात् यः भिक्षां गृह्णाति परजन्मनि स चाण्डालो भूत्वा जायते। यज्ञोद्देश्येन भिक्षां याचयित्वा तत् द्रव्यं यदि सम्पूर्णं नैवं समर्पयति तर्हि स व्यक्तिः परजन्मनि भासः काको वा भूत्वा जन्म गृहणाति। अत्र **समा :** अर्थात् अब्दान् यावत्। मनुश्च

**"यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति।**

**स याति भासतां विप्रः काकतां वा शतं समाः"**[14]॥

गृहस्थः कुसूलधान्यः, कुम्भीधान्यः दिनत्रयं यावत् धान्यसञ्चयी स्यातत्, एकस्य एव दिनस्य कृते वा धान्यसञ्चयी भवेत्। स्वकुटुम्बपोषणे द्वादशाहमात्रपर्याप्तं धान्यं यस्यास्ति स कुसूलधान्यः। स्वकुटुम्बपोषणे षड्हमात्रपर्याप्तं धान्यं यस्यास्ति स कुम्भीधान्यः। त्र्यहः पर्याप्तं धान्यमस्यास्तीति त्र्याहिकः। श्वोभवं धान्यादिकं श्वस्तनम्, न विद्यते श्वस्तनं यस्यऽसौ अश्वस्तनम्। अर्थात गृहस्थः कुसूधान्यः, कुम्भीधान्यः, त्र्याहिकः, अश्वस्तनो वा भूत्वा जीवेत्। एतेषामुपायानामभावे शिलोञ्छवृत्या जीविकां निर्वहेत्। तत्र शाल्यादिनिपतित परित्यक्तवल्लरी ग्रहणं शिलम्, एकैकस्य परित्यक्तस्य कणस्योपादान्मुञ्छः। शिलं च उञ्छश्च शिलोञ्छं तेन शिलोञ्छेन वा जीवेत। तत्र कुसूलधान्यः, कुम्मीधान्यः, त्र्याहिकः अश्वस्तन इति चतुर्विधः गृहस्थः वर्णितः महर्षिणा याज्ञवल्क्येन -

**"कुसूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा।**

[13] मनुस्मृतिः - 11 /26

[14] मनुस्मृतिः - 11 /24

**जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः"[15] ॥**

एतेषां कुसूलधान्यादीनां ब्राह्मणादिगृहस्थानां – चतुर्षु परः परः श्रेयः प्रशस्तश्च भवन्ति ।

इतोऽपि मनुना प्रतिपादितं यत् –

**"अद्रोहेणैव भूतानामत्वपद्रोहेण वा पुनः।**

**या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि"[16]॥**

गृहस्थः सर्वेषामाश्रमाणां जनकः , पालकः , धर्मसंरक्षकश्च भवति । भगवता मनुना गृहस्थस्य प्रशंसायां प्रतिपादितं यत् -

**"यथा वायुं समाश्रित्य वर्तन्ते सर्व जन्तवः।**

**तथा गृहस्थमाश्रित्य वर्तन्ते सर्वाश्रमाः"[17] ॥**

**वशिष्ठेन प्रतिपादितं यत् -**

**"यथा मातरं समाश्रित्य सर्वे जीवन्ति जन्तवः।**

**एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः"[18]॥ इति॥**

**सन्दर्भग्रन्थसूची**

---

[15] याज. स्मृतिः - 1/128

[16] मनुस्मृतिः - 4 /2

[17] मनुस्मृतिः - 3 /77

[18] वशिष्ठस्मृतिः - 8 /16

- याज्ञवल्क्यस्मृतिः, विज्ञानेश्वर प्रणीत मिताक्षराटीका
- मनुस्मृति, डॉ. मीना कुमारी, निर्माण प्रकाशन (प्रकाशक), त्रिवेणी ऑफसेट (मुद्रक), दिल्ली , प्रथम संस्करण २००५.
- मनुस्मृतिः, रुस्तगी डॉ. श्रीमती उर्मिला , जे. पी. पब्लिशिंग हाउस, दिल्ली (प्रकाशक), तरुण ऑफसेट प्रिंटर्स (मुद्रक) दिल्ली, प्रथम संस्करण २००२.
- मनुस्मृतिः, (सुपरिमर्जित कुल्लूकभट्टकृतमन्वर्थमुक्तावलीसहिता), कौण्डिन्न्यायनः, शिवराजआचार्यः, चौखम्बा विद्याभवन, वाराणसी, २०१४ ई.
- धर्मशास्त्र का इतिहास (प्रथम भाग) काणे, डॉ. पाण्डुरंग वामन, अनुवादक : अर्जुन चौबे कश्यप, उत्तर प्रदेश हिन्दी संस्थान (प्रकाशक) , स्वास्तिक प्रिंटिंग प्रेस (मुद्रक) , लखनऊ .